18 b) Ñ2 B1 2 4 D5 7 9-11 T1 3 M1 2 5 अन्य (for अन्यच्) G2 3 चिकीर्षति, Cg as in text (for करिष्यति) —For 18a,b, Ś Ñ1 V B3 D0-4.8 12 13 subst., Ñ2 B2 ins. after 18a,b.

426* क वसत्यद्य रजनीं कतरेणेप्यते पथा।

[Ñ1 B2 3 D3 क वत्स्यति, Ñ2 illeg (for क वसति). Ñ V2 B2.3 (sup lin also निर्गमश्च)निशामद्य(V2 °ध्ये) (for [अ]द्य रजनीं) D0 इमानि वृत्य रजनीं (for the prior half) N2 B2 3 कतमेन S2 [ए]ष्यते, D1 [आ]व्रजत्, D4 [ई]क्ष्यते (for [इ]ष्यते) D13 कदा च रणमिष्यते (for the post half)]

—B3 om 18c,d —c) B4 विपुलं, D8 निर्गुण- (sic), T3 G2 निपुण, Cg as in text (for निपुण) B1(with hiatus) तस्य, T3 M1 2 शीघ्रम्, Cg as in text (for सर्वम्) Ñ V2 विज्ञाय सर्वेनेपुण्याद् —d) Ś2 B1 D1-3 7 8 12 G1 3 विशेषत., Cg as in text (for अशेषतः) Ñ V2 B4 आगच्छत कृतत्वरा· ❀ Cg अशेषत सर्वप्रकारेण विज्ञायागन्तव्यम्। अशेषत· अशेषश्चारैरिति वार्थे। अशेषत इत्युत्तरशेषो वा ❀

19 a) B2 4 चरेण (for चारेण). Ñ(Ñ1 m. also) हि हत·; Ñ1 V2 हि तत, V1 3 च हत, B निहृतः; D0.4 13 तु हत., D2 8 12 विहि(D12 °ह)त; D5 विधिवत् (for विदित) D6 तत्र (for शत्रु·). —b) Ñ1 B2-4 प्रणीतैर् (for पण्डितैर्) —c) Ś D8.12 युद्ध तुल्येन; D1 6 7 T G M1 2 5 युद्धेष्वल्पेन, D13 युद्धं स्वल्पेन (for युद्धे स्वल्पेन). D0 युद्धेन, D4 वीर्येण (for यत्नेन). D8 यो स्वल्पेषु च युद्धेन (sic), G(ed) युद्धे स्वल्पप्रयत्नेन —d) Ś D8 12 समासाच (for समासाद्य)

20 Ñ2 illeg for 20a. —a) Ñ1 B1 4 चरास्तु ते; B2 G2 च(G2 चा)राश्च ते, D1.3 चा(D3 च)रास्ते तु (for चारास्तु ते) —b) L(ed.) प्रहृष्ट. Ś D8 12 प्रहृष्टे राक्षसेश्वरे, G(ed) शार्दूलाद्या दशानन —After 20a,b, Ś Ñ2 B1 3 4 D2 8(after 20).6-13 S ins

427* शार्दूलमग्रत कृत्वा ततश्चक्रु प्रदक्षिणम्।
ततस्ते त महात्मान चारा राक्षससत्तमम्।

[B3 transp 1 1-2 repeating 1 2 in its proper place —(1 1) Ś Ñ2 B1 3 4 D2 8 12 13 पुरत, G2 भ्रमत. (for अग्रत) Ś Ñ2 B1.3 4 D2 8 12 13 हृष्टाश् (for ततश्). B3(marg also) भर्तृभक्तिपुरस्कृता, D3 सर्वे दानवरूपिणः (for the post. half). —Ś D2 3 8 12 om 1 2 B3 reads l. 2 (first time) in marg —(1 2) Ñ2 तु ते, B1 3(second time) D10 11 त तु, D6 T2 त ते (by transp), D7 त्वेन, D9 तु त (for ते त). B1 3(first time) 4 चरा (for चारा) G2 3 M5 -युगत (for -सत्तमम्) D13 रावण राक्षसाधिप (for the post half).]

—c) D4 प्रदक्षिणा —d) Ñ1 B2 3 यत्र तौ रामलक्ष्मणौ.

21 Ñ2 illeg. for 21a —a) B3 तौ (for ते). Ś D8 12 गत्वा सुवेल(D8 12 वेलस्य)शैलस्य, V3 तौ गिरेश्च सुवेलस्य.—For 21c – 22b, Ś Ñ1 B1 2 D8 12 subst. 429*, V D0-4 13 (V1 3 D1-4 l. 1-2 only, D0 l 2 only) subst 429* for 21c,d. B3 reads 21c – 22 in marg. —c) G3 भूत्वा (for गत्वा). —d) T1 damaged for सुग्रीव G1 विभीषण —After 21, Ñ2 ins l 2-3 of 429*, while D6-7 9-11 S ins ·

ते तु धर्मात्मना दृष्टा राक्षसेन्द्रेण राक्षसाः ।
विभीषणेन तत्रस्था निगृहीता यदृच्छया ॥ २२
वानरैरर्दितास्ते तु विक्रान्तैर्लघुविक्रमैः ।
पुनर्लङ्कामनुप्राप्ताः श्वसन्तो नष्टचेतसः ॥ २३

ततो दशग्रीवमुपस्थितास्ते
चारा बहिर्नित्यचरा निशाचराः ।
गिरेः सुवेलस्य समीपवासिनं
न्यवेदयन्भीमबलं महाबलाः ॥ २४

G 6. 5 0
B 6 29 29
L 6 5. 27

इति श्रीरामायणे युद्धकाण्डे विंशतितमः सर्गः ॥ २० ॥

428* प्रेक्षमाणाश्चमूं ता च बभूवुर्भयविक्लवा ।

[D6 T1 ता तु, M6 दूता (for ता च) D10 11 -विह्वला .]

22 B3 reads 22 in marg (cf v l 21) Ñ2 illeg for 22^{a} —^{a}) D6 11 दृष्ट्वा V1 3 D0-4 13 ते हि मायाधरा दृष्टा(D0 1,4 °ष्ट्वा), V2 केचित्मायावृता क्रूरा , B3 त तु मायाविनो जुष्टा —^{b},) Ñ2 B3 लक्षिता , V2 ५ क्षिता (for राक्षसा) —For 21^{c} – 22^{b}, Ś Ñ1 B1 2 D8 12 subst , Ñ2 ins l 2-3 after 21 and l 4 after 22^{cd} (first occurrence), V1 3 D1-4 subst l 1-2 only for 21^{cd}, V2$^{1}_{2}$D13 subst for 21^{cd}, B3 ins after 22, B4 subst. for 22^{ab}, D0 subst l 2 only for 21^{cd}.

429* आसेदुर्हरिसैन्येन सवृतौ सविभीषणौ ।
प्रच्छन्नाश्चरतश्चात्र तान्ददर्श विभीषण ।
विज्ञाय वचन तेषा स चक्रे राक्षसेश्वर ।
ते दृष्ट्वा वानरबल राक्षसा वानरार्दिता ।

[(l 1) B3 सेदतुर्, B4 आसीनौ (for आसेदुर्) Ñ1 B3 तावुभौ (for सवृतौ) V2 रामलक्ष्मणौ, B4 शत्रुभीषणौ (for सविभीषणौ) —(l 2) D2 प्रसन्नाश् Ñ1 V B3 D2-4 तत्र (for चात्र) Ñ2 B1 4 प्रच्छन्नास्तु चरास्ताश्च(Ñ2 B4 °स्तत्र), B2 प्रच्छन्नाश्च चरास्तत्र (for the prior half) Ñ1 B स (for तान्) N2 ददर्श स (for तान्ददर्श) —V2 illeg for l 3 —(l 3) Ñ B1-3 अतर्धानवध ते(Ñ1 B3 चैवा, B4 अवज्ञाय विधिस्तेषा (for the prior half) Ś1 समीपे (for स चक्रे) —(l 4) B4 स (for ते) B1 वानरर्षभ (sic) ; B3 वानरवने (for वानरबल). B4 कपिरूपिण (for वानरार्दिना).]

—Thereafter, Ñ2 repeats 22^{cd}, while D13 reads 22^{cd} for the first time after 429* repeating it in its proper place —^{c}) V3 D0 2 13(second time) सत्रस्ता, D1 3 4 सदिष्टा (for तत्रस्था) Ś Ñ2(second time) B1,3 4 D8,12 13 (first time) नि(B4 [m also] D8 12 नि)वेदुर्भयसत्रस्ता —^{d}) D13(second time) विगृहीता D3 यथेच्छया Ñ2(second time) B1 2 4 D13(first time) वानरैरर्दिता भृश —For 22^{cd}, Ñ1 subst , N2 (illeg) B1 2 4 D13 (after 22^{cd} [first time]) ins. after 22, B3 cont after 429*

430* घृणया न हता. सर्वे वानरैर्जितकाशिभि· ।

[B1 गवयेन (for घृणया न)]

—After 22, D1 5-7 9-11 13 (after 22^{cd} [r]) S ins

431* शार्दूलो ग्राहितस्त्वेक पापोऽयमिति राक्षस ।
मोचित सोऽपि रामेण वध्यमान प्लवगमै· ।
क्षनृशसेन रामेण मोचिता राक्षसा परे ।

[(l 1) D1 कर्दूलो G1 चारो, Cm k t as above (for पापो) —After l 1, G M6 ins

431(A)* गृहीत पीडितश्चैव वानरैर्बहुभिर्वृत ।

—(l 2) D7 10 11 मोक्षित सोपि, G M6 ततो विमुक्तो, Cg as above (for मोचित सोऽपि) —After l 2, D1 13 ins

431(B)* तस्यैव च परिज्ञानाद्वानरैर्जितकाशिभि ।
चरा शेषा क्षनुज्ञाता रावणस्य दुरात्मन ।

— D1 13 om l 3 —(l 3) D6 T1 आनृशस्येन M3 रामस्य (for रामेण) D6 7 9-11 G1 M1 2 5 मोक्षिता, Cm t as above (for मोचिता)]

23 ^{a}) D6 T7 M6 तैस् (for ते) Ñ1 V2 B2 4 निर्भर्त्स्य वानरैस्ते तु —^{b}) M6 विक्रमाल् Ś B2 D8 12 लघुविक्रमा ; G1 बलदर्पितै (for लघुविक्रमै) Ñ1 B1 4 गृह्य(B4 om) मुक्ता लघुक्रमा (B4 °म), V2 मुक्ता लघुपराक्रमा ❀ Cg विक्रान्तैरित्यत्र विक्रममात्रोक्तैर्लघुविक्रमैरित्यत्र जवमात्र विक्रमस्य विशेष्यते ❀ —After 23^{ab}, D3 ins

432* दयापरेण रामेण दर्शयित्वा चमूं तत ।
मुक्तास्ते राक्षसास्तेन धर्मज्ञेन महीक्षिता।

—^{c}) Ñ1 V2 B ते लका समनुप्राप्ता .—^{d}) D6 -चेतना. (for चेतस) —After 23, B3(marg) ins

433* भयात्कृताञ्जलिं दीन श्वसन्तमिव पन्नगम्।
दृष्ट्वा तु राक्षसेन्द्रोऽसौ वाचा मधुरया तदा।
उवाच प्रहसन्नेव रावणो भीमदर्शन ।

—Thereafter it cont the lines of 6 21 4 (in marg).

[(l 1) त (for तु) वाचा मत्रम् (for वाच मन्दन्) —(l. 2) महा- (for तदा) वाक्यमब्रवीत् (for भयविह्वल)]

24 D6 T1 om 24 —^{a}) Ś Ñ V B D0-4 8 12 13 पुनश्च्, G1 तु, G2 M तु ते (for ते) —^{b}) Ś2 Ñ V B

२१

ततस्तमक्षोभ्यबलं लङ्काधिपतये चराः ।
सुवेले राघव शैले निविष्टं प्रत्यवेदयन् ॥ १
चाराणां रावणः श्रुत्वा प्राप्तं रामं महाबलम् ।
जातोद्वेगोऽभवत्किंचिच्छार्दूलं वाक्यमब्रवीत् ॥ २
अयथावच्च ते वर्णो दीनश्चासि निशाचर ।
नासि कश्चिदमित्राणां क्रुद्धानां वशमागतः ॥ ३
इति तेनानुशिष्टस्तु वाचं मन्दमुदीरयत् ।
तदा राक्षसशार्दूलं शार्दूलो भयविह्वलः ॥ ४
न ते चारयितुं शक्या राजन्वानरपुंगवाः ।
विक्रान्ता बलवन्तश्च राघवेण च रक्षिताः ॥ ५

D1-4 8 12 13 1 3 चरा (for चारा) B3(*sup. lin*), D1 हि ते (for वहिर्). —c) D13 निवेश- (for समीप-). Ś D2 8 12 वर्तिन, Ñ1 B4 D1 4. 13 वासिनां (for वासिन). ❀ Cg समीपवासिनमिति पुस्तकमार्षम्. ❀ —d) D10 निवेदयद् (for न्यवेदयन) D9-11 रामबलं, G1 भीमतर (for भीमबल) Ś Ñ V B D0 2 4 8 12 13 च तद्बल, D1 6 महाबल, D3 महद्बल, M1. 2 रघूत्तम (for महाबला)

Colophon —*Kāṇḍa name* Ñ V3 B D2 13 लंकाकांडे, D0 4 सुंदरकांडे. —*Sarga name*· Ś1 चाराप्रवेशन, Ś2 V1 D2 8 12 चारानुप्रेषण, Ñ B2 9 च(B3 चा)रप्रत्यागमन, V2 चारानुप्र*ष, B1 चारविधि·, B4 चारप्रणिधि ; D0 4 चारानुप्रवेशन, D1 चारप्रेक्षण, D3 चारानुप्रेक्षण, D9 शार्दूलागमन, D13 चारानुप्रत्यागमन —*Sarga no* (figures, words or both). Ś1 Ñ1 B2 D0 2 4 9 12 13 om, Ś2 Ñ2 V B1 3 4 D3 5, D1 7, D5-7 10 11 T1 3 G M 29, D8 4, T2 28 —After colophon, D2 concludes with राम, G M1 2 5 with श्रीरामाय नम.

21

1 ☞ Cv is missing from 6 21 1 up to 6 21 19 (cf v l. 6 20 9) For 1-2, Ś Ñ V B D0-4 8 12. 13 subst 434* —a) D5 9 T1 तद् (for तम्) —d) G1 सुनिविष्ट न्यवेदयन.

2 a) G1 चाराणा D5 T1 वचन. D6 T2 3 राक्षसः (for रावण·) ❀ Cr: चारेभ्यः। प्राप्त राम महाबलमिति पाठ·। ; Ck t चाराणा वचनमि(Ct °नादि)ति शेष. ❀ —T1 (partly) damaged for °. —e) G1 3 चेदम्, M5 इदम् (for वाक्यम्). —For 1-2, Ś Ñ V B1 2. 3 ([marg] reads after 4). 4 D0-4 8 12 13 subst.

434* वीक्ष्यमाण विषण्ण तु शार्दूल शोककर्शितम्।
भयाज्जडीकृतैरङ्गै श्वसन्तमिव पन्नगम्।
उवाच प्रहसन्नेव रावणो भीमदर्शन ।

[V3 om l. 1. —(l. 1) Ś1 वीक्षमाण, Ñ B1-3 वीक्ष्य-(B2 3 °क्ष)माणो, D0. 1. 4 विभीषण (for वीक्ष्यमाण) Ñ1 विवर्णस्तु, Ñ2 B4 विषण्ण त, B3 विवर्णश्च, D1 विषिण्यंत (sic); D2 निषण्ण तु, D4 विवर्ण च, D13 विषण्ण च (for विषण्ण तु). Ñ1 शार्दूल·. Ñ2 B3 सह तैश्चरै. (for शोककर्शितम्). —Ñ1 om. l. 2. —(l 2) B3 वार्यय· (for वर्ह). V3 D0 2 13 भयाज्जलिकृतैरंग· (D2 °श्चरै, D13 °तं शेष), B4 भयाज्जडीकृतं कष्टं, D1 कृतांजलि शरैरंग ; D3 भयात्सदुचितैरंग (for the prior half). —B2 (m) reads l. 3 for the first time here, repeating it in marg after 4ab —(l. 3) Ñ1 B2(first time) प्रहसन्नेव, Ñ2 B4(second time) प्रहस्यन्त च(B2 तु) (for प्रहसन्नेव) Ñ2 B2 लोकरावण (for भीमदर्शन). Ñ1 B2 (second time) रावण लोकरावण (for the post. half). —After l 3 (second occurrence), B2 (m) ins

434(A)* न ते चारयितुं राजन्वानराणां वशं गत ।
वानर रूपमास्थाय प्रविष्टो वानरं बलम् ।]

3 Ñ1 om 3-4 B2 (marg) reads 3a-4b after 5ab —a) Ñ2 अन्यथा दृश्यते, V2 3 B2 अयथा प्रेक्ष ते; B1 अयथा दृश्यते, B3 D0 अथ यावच्च ते, B4 अन्यथा वर्तते, D13 अन्यथावच्च ते, M5 अयथावाश्च ते (for अयथावच्च ते) —b) B4 [अ]पि, D13 [इ]ति (for [अ]सि). D6 दीनश्चासीन्निशाचर· —c) V2 B4 D1 2 6 13 [अ]स्ति (for [अ]सि). B4 D1 3 8 M1 3 कश्चिद्, D0 क्वचिद्, D5 T1 किंचिद्; D13 किम्बिद्, Ck t as in text (for कश्चिद्) —d) G1. 3 तेषा स्व (for क्रुद्धाना) D0 हस्तमागत·, D4 दर्शनं गत·

4 Ñ1 om. 4, B2(marg) reads 3-4b after 5ab (for both, cf v l 3). —a) D2 3 -दिष्टस् (for -शिष्टम्) D1 सन्; D0 7 स्व (for तु). —b) Ś Ñ2 V1 3 B1. 2 4 D0 2-4 8 12 13 वचो, B3 वाचा, M1 2 वाक्य (for वाचं) Ś Ñ2 V B D0-6 8 10-13 T1 G1 2 M5 उदीरयन्, G3 M1 2 उदैरयत् (for °यत्) ❀ Cr m g उदीरयत्(Cm °यदिति)। अडभाव आर्ष.❀ —After 4ab, B2(marg) repeats l. 3 of 434*. —c) Ś Ñ2 V B D0-4 8 12 13 महा-, D6 G3 ततो, G1 तथा (for तदा). —d) D0 4 राक्षसो (for शार्दूलो). Ś Ñ2 V B D0-4 8 12 13 वाक्यमब्रवीत्; D0 10 11 T2 3 G M1 2 5 °विक्लवः (for भयविह्वल·). —After 4, B2(marg.) reads 434*.

5 a) Ś D2 3 8 12 वारयितुं, Ñ1 D9 चाल°; Ñ2 लघ°; B1 भाव°, D5 हर° (sic) (for चारयितु) D0 राम (sic), D3 राजन् (for शक्या) —B1 om.(hapl) 5b-6a. —b) D0 3 शक्या, D6 युद्धे (for राजन्) —After 5ab, B2 (marg.) reads 3-4b. —c) D3 तु, G3 सु- (for च). D1 [अ]पि पालिता. (for च रक्षिताः).

नापि संभाषितुं शक्याः संप्रश्नोऽत्र न लभ्यते ।
सर्वतो रक्ष्यते पन्था वानरैः पर्वतोपमैः ॥ ६
प्रविष्टमात्रे ज्ञातोऽहं बले तस्मिन्नचारिते ।
बलाद्गृहीतो बहुभिर्बहुधास्मि विदारितः ॥ ७
जानुभिर्मुष्टिभिर्दन्तैस्तलैश्चाभिहतो भृशम् ।
परिणीतोऽस्मि हरिभिर्बलवद्भिरमर्षणैः ॥ ८
परिणीय च सर्वत्र नीतोऽहं रामसंसदम् ।
रुधिरादिग्धसर्वाङ्गो विह्वलश्चलितेन्द्रियः ॥ ९
हरिभिर्वध्यमानश्च याचमानः कृताञ्जलिः ।
राघवेण परित्रातो जीवामि ह यदृच्छया ॥ १०
एष शैलैः शिलाभिश्च पूरयित्वा महार्णवम् ।
द्वारमाश्रित्य लङ्कायां रामस्तिष्ठति सायुधः ॥ ११
गरुडव्यूहमास्थाय सर्वतो हरिभिर्वृतः ।
मां विसृज्य महातेजा लङ्कामेवाभिवर्तते ॥ १२

G 6. 6 12
B 6 30 12
L 6. 6 11

6 B1 om 6ª (cf v l 5) —ª) N नाभिभाषयितु, V1 2 B2 4 न सभाष(B4 °व)यितु, B3 नाभिसभाषितु, D5 T1 नापि स्म भाषितु, D12 नापि सभावितु (for नापि स°) —ᵇ) Ś V1 B2 4 D0-4 8 12 सप्रश्नोपि, V3 सप्रवेणो(sic), B3 सप्रश्नो हि, D13 सप्रवेशो (for सप्रश्नोऽत्र) Ñ V2 B2 3 D9 विद्यते (for लभ्यते) B1 सप्रश्नोपि न बध्यते —ᶜ) D1 रक्षितो, G1 लक्ष्यते, L (ed) दृश्यते (for रक्ष्यते). D1 मार्गो (for पन्था).

7 ª) Ś Ñ1 V B D0-4 6 8 12 13 T3 प्रविष्टमात्रो, Cg as in text (for °मात्रे) D1 विज्ञातो (for ज्ञातोऽहं) —ᵇ) Ś1 Ñ1 V1 2 B2-4 D3 8 12 अवारिते(Ś1 D8 12 °त), Ś2 Ñ2 V3 B1 D4 M5 निवारिते(Ś2 Ñ2 B1 °त), D1 उपारिते (sic), D7 10 11 Ck t विचारिते, D9 अनादृते, Cg as in text (for अचारिते) G1 बलेस्मिन्नपराजिते —After 7ª·ᵇ, D1 13 ins

435* विभीषणेन च ज्ञातो गृहीतो बहुशालिभि ।;

while D3 ins after 7ª·ᵇ

436* विभीषणस्य वे बुद्ध्या ततोऽहं राक्षसर्षभ ।

—Ñ1 om 7ᶜ·ᵈ B3 reads 7ᶜ·ᵈ in marg —ᶜ) Ś V2 D0 1 4 8 13 तथा, V1 3 अहं, D2 ततो (for बलाद्) Ś D1 2 8 12 13 बलिभिर्, Ñ2 B D3 G1 हरिभिर्, V2 D5-7 9-11 T2 3 M Cg k t रक्षोभिर्, D4 बहुधा, L1 कपिभिर् (for बहुभिर्) —V2 illeg for ᵈ —ᵈ) Ś1 V1 3 D0 1 4 8 12 13 विप्रकर्षित, Ś2 विप्रकीर्तित, Ñ2 B1 3 4 [अ]भि चिकुटि-(B4 °चि)त, B2 D6 9-11 Cg t [अ]भि विचारि(D9 Cg °लि)त, D2 सप्रधर्षित, D8 [अ]भिविकर्षित, M3 [अ]भि विचालित°, M5 प्रवि° (for [अ]भि विदारित) G1 बहुभि क्षिप्रकारिभि, G2 3 हरिभिर्विप्रकारिभि (G3 °त)

8 ª) M1 2 मुष्टिभिर्जानुभिर् (by transp) V2 चैव, V3 हस्तैर् (for दन्तैस्) —ᵇ) V3 दंतैश्, D1 शूलैश्, D8 13 तालैश् (for तलैश्) Ñ1 V B1 2 4 D1 2 4 9 T3 [अ]पि (for [अ]भि-) —D4 transp 8ᶜ–9ᵇ and 9ᶜ–10ᵇ —ᶜ) Ś V1 3 D0-3 8 12 13 विप्रणीतो, Ñ1 B2-4 परिभूतो, V2 अभिभूतो, B1 परिवृतो, D6 परिक्षिप्तो (for परिणीतो) Ś D8 12 बलिभिर् (for हरिभिर्) D4 हरिभिर्विप्रणीतोस्मि. —ª) Ś L8 12 हरिभिस्तर्, D9-11 बलमध्ये (with hiatus) (for बलवद्भिर्).

9 D4 transp 8ᶜ–9ᵇ and 9ᶜ–10ᵇ —ª) Ñ V2 B परिभूय (for परिणीय) —ᵇ) Ś Ñ1 D8 12 13 भीतो (for नीतो) Ś1 Ñ2 V B1 2 4 D0-3 8-12 M6 रामसदि, B3 °सपद, D4 °मनिधौ, M1 2 °सनिधि (for °समदम्) —V3 om 9ᶜ·ᵈ —ᶜ) Ś V2 B1 3 4 D0-4 8 12 13 -[आ]प्लुत-, B3 -दिग्ध-, D5 T1 -[आ]सिक्त-, G1 -[आ]रक्त- (for -[आ]दिग्ध) D7 9 10 11 Ct रुधिरस्रावितादीनागो (D9 °रिश्चागो) —ᵈ) Ś D8 12 13 विह्वलश्चाजितेंद्रिय, T3 [ऽ]ह बालेश्चलितेंद्रिय

10 D4 transp 8ᶜ–9ᵇ and 9ᶜ–10ᵇ —ª) D8 वाद्य-मानश्च (sic) (for वध्य°) —ᵇ) V3 नीयमान (for याच°). —ᶜ) G3 परित्राणो —ᵈ) Ś Ñ1 V D0-4 8 12 13 जीवन्नेव, Ñ2 जीवाम्ये॰ (illeg), B1 2 4 जीवाम्यद्य, B3 जीवाम्येष, D5 जीवामि च, D6 7 T G M3 5 Cg जीवामीति, D9-11 Ct मामेति च (for जीवामि ह)

11 ª) Ś D8 12 वृक्ष-, Ñ1 B3 एव, Ñ2 द्रुम-, V D0-4 12 वृक्षै, B1 D9-11 M3 शैल- (for शैलै) D9-11 तु (for च) Ñ B3 शिलासल्यै (Ñ1 °है॰[sic]) —ᵇ) V2 D2 M1 2 महोदधि (for महार्णवम्) —ᶜ) Ś V1 B1 2 D1-3 8 12 13 आवृत्य Ñ B3 आपाद्य, V3 आगत्य (for आश्रित्य). D6 T2 3 लंकाया द्वारमाश्रित्य —ᵈ) D3 [अ]वारित (for सायुध)

12 ª) Ś V D2 गरुडं, Ñ1 B D0 1 3 4 8 12 13 गारुड (for गरुड-) Ñ1 आधाय, B3 आदाय, D6 T3 आश्रित्य, T2 आवध्य, Ck t as in text (for आस्थाय) —ᵇ) Ś V1 2 D0-2 4 8 12 13 वानरैर्बहुभिर् (for सर्वतो हरिभिर्) B2 4 सर्वै-र्हरिभिरावृत, D3 स सर्वैर्हरिभिर्वृत. —ᶜ) G महाबाहुर् (for °तेजा) —ᵈ) Ś V1 2 B4 D0-1 6 8 12 13 T2 3 M5 [उ]पवर्तते, Ñ B1-3 [उ]पवर्पति, V3 illeg, D9-11 [अ]भि° (for [अ]भिवर्तते) —After 12, Ñ1 ins; B3 cont (followed by st 13 in marg) after 441*, B4 ins after 13

437* एतच्छ्रुत्वा दशग्रीव पुनरेवाभ्यभाषत ।

Anna Research Team

2 पुरा प्राकारमायाति क्षिप्रमेकतरं कुरु ।
3 सीतां चास्मै प्रयच्छाशु सुयुद्धं वा प्रदीयताम् ॥ १३
2 मनसा संततापाथ तच्छ्रुत्वा राक्षसाधिपः ।
शार्दूलस्य महद्वाक्यमथोवाच स रावणः ॥ १४
यदि मां प्रतियुध्येरन्देवगन्धर्वदानवाः ।
नैव सीतां प्रदास्यामि सर्वलोकभयादपि ॥ १५
एवमुक्त्वा महातेजा रावणः पुनरब्रवीत् ।
चारिता भवता सेना केऽत्र शूराः प्लवंगमाः ॥ १६
कीदृशाः किंप्रभावाश्च वानरा ये दुरासदाः ।
कस्य पुत्राश्च पौत्राश्च तत्त्वमाख्याहि राक्षस ॥ १७
तथात्र प्रतिपत्स्यामि ज्ञात्वा तेषां बलाबलम् ।
अवश्यं बलसंख्यानं कर्तव्यं युद्धमिच्छता ॥ १८
अथैवमुक्तः शार्दूलो रावणेनोत्तमश्वरः ।
इदं वचनमारेभे वक्तुं रावणसंनिधौ ॥ १९

---

13 Ñ1 om 13–16 B2i marg) reads 13 after 437* —a) Ś Ñ2 B3 D8 12 पुरी-, D0-4 12 T1 पुर-, Cm g. k t as in text (for पुरा) Ś Ñ2 V1 2 B1-3 D0-4 8 12 13 आयात ; D10 T3 G1 3 आयाति, Cm g l t as in text (for आयाति) B4 पुरीप्रकपनात्प्राप्तश्च —b) D1 मे वचन, D6 प्रेक्ष्येतर(corrupt), Cm g as in text (for एकतर) —c) Ś Ñ2 V B2 4 D0-4 8 12 13 वा म , B1 3 राम, D6 T2 3 G M वास्मै, D7 चापि, D9-11 वापि (for चास्म) D2 6 [आ]शु (for [आ]शु) —d) Ñ2 B1 2 युद्ध वाशु, V2 B3 D5 10 11 G M5 युद्ध वापि (for सुयुद्ध वा) Ś V3 D0 3 4 8 12 13 युद्ध वा समिधीयता, V1 युद्ध वा [illegible]यतां, B4 D1 2 युद्ध वा सप्रदीयता. —After 13, B4 ins 437*.

14 Ñ1 om 14 (cf. v l 13) B3 reads 14 in marg —a) Ś D2 8 12 13 मनसेवोपपन्नार्थं, Ñ2 V3 (illeg up to त्प) B1-3 D0 मनसा चो(D0 सो)त्पपाते-(D0 °ते)व, V1 2 D1 आयनाद्रुत्पपाते(D1 °ते)व, B4 मनसा चिंतयन्नेव, D3 मनसाह्ययमानेन, D4 मनसा चोत्पपातोथ, D5 T2 मनसा स तदा भीतम्, D9-11 M1 6 मनसा तत्त(M° त त)दा प्रेक्ष्य, T3 मनसा स तु तापार्तम्, G1 मनसा चासतापेन; L (ed) स त्पथोत्पपातेव —b) V3 B D3 राक्षसेश्वर° .—c) Ś Ñ2 V D0-2 4.5-13 M3 शार्दूल सु- (for शार्दूलस्य) T1 च तद् (for महद्) —D6 illeg. for d (except अथो) —For 14, M1 2 subst.

438* शार्दूलस्य वच° श्रुत्वा रावणो राक्षसाधिप ।
अन्वीक्ष्य मनसा सर्वमिदं वचनमब्रवीत् ।

15 Ñ1 om 15 (cf v l 13). —a) T3 मा (for मा). Ś Ñ2 V B D0-4 8 12 13 प्रतियोत्स्यते(B1-3 °ति), D9-11 °युध्यते, M5 °पिध्येरन् (for °युध्येरन) —b) D2 -मानवा° (for -दानवा) —B3 reads 15°–16a in marg —c) Ñ2 B [अ]ह, D3 [ए]वं, D6 च (for [ए]व). Ś D2 8 12 13 प्रयच्छामि

16 Ñ1 om. 16 (cf. v l. 13) B3 reads 16 in marg (cf v l 15). —a) B2 महावीरो (for एवमुक्त्वा). Ñ2 दशग्रीव , V2 D3 °राजो, V3 म**जा (for महातेजा). —b) Ñ2 पुनरेवाभ्यभाषत. —cd) Ś Ñ2 V B1.2 4 D2 8–12 G3 M1 2.5 Ck t चरि(D11 °र)ता; B2 दृष्टा वै, T3 चालिता, Cm g as in text (for चारिता) N2 B केत्र, Cm g k.t as in text (for सेना) Ñ2 V3 B शूरा केत्र (by transp , V3 illeg from त्र up to 17 a), D5 T1 G2 3 के तु शूरा , G1 के च शराः , Cg as in text (for केऽत्र शूरा). T3 शरा सेना केत्र (by transp.) Ś V1 D0–4 8.12.13 शूरा° वे (D6 कि) तत्र वानरा , V2 शूरास्तत्र च वानरा (for a) —After 16, B3 ins 441*

17 V3 illeg for 17a (cf. v l. 16) D12 om 17ab —a) D9-11 किंप्रभा , Cg as in text (for कीदृशा) Ś Ñ1 V1 2 B D0-4 8 13 कति वा(D12 के) सौम्य, Ñ2 सचिवाः सोम्य, D5 6 T G1.3 M2 Cg किंप्रभा° सौम्य, D7 किंप्रमाणाश्च, D9-11 कीदृशा° सौम्य, M6 संवृत्ता सौम्य, G (ed) कति वा सन्ये (for किंप्रभावाश्च). —b) Ñ1 च, D1 3 ते, D5 T1 M1.3 के (for ये). D6 T3 वानराणा, D12 ते नरा ये (for वानरा ये) —cd) D6 तस्य (for कस्य) D4 हि (for first च) B1 2 4 ते सर्वे (for पौत्राश्च). Ś D8 12 त्व समाख्याहि, D2 तत्त्वमाख्यान (for तत्त्वमाख्याहि). D3 राक्षस°, D9-11 सुव्रत, G1 पृच्छ (for राक्षस) Ñ B3 एतत्सर्वं समागेन तत्त्वतो वक्तुमर्हसि

18 B3 om. 18ab —a) Ś V D0 1 6 8 9 12 13 T3 तद(D6 12 °दा)त्र, Ñ तत्त्वा, T1 कदात्र; Cm g t as in text (for तथात्र) —V3 illeg. from पत्स्यामि up to first च in b. Ś D8 12 13 प्रविधास्यामो, Ñ तत्र वक्ष्यामि (Ñ2 illeg), B2 D0 4 प्रतिपत्स्या(D4 °इया)मो, B4 D2 °योत्स्यामो, D1 °पद्यामि, M5 ब्रूहि वेत्स्यामि (for प्रतिपत्स्यामि). —b) Ś1 D8 चैव, Ś2 D12 13 चैषा (for तेषा) D1 तेषा ज्ञात्वा (by transp). D11 महाबलं (for बलाबलम्) —c) D9-11 खलु (for बल-) —V3 illeg for d —d) Ś V1.2 B1 4 D0-4 8 12 13 युद्धलिप्सुना(D1 °भि°), Ñ युद्धवृद्धये, B2 युद्धनिश्चय°, D9 M3 युद्धमिच्छता, G2 योद्धुमिच्छता

19 a) Ñ B3 स, V2 B4 D6 T2 तथा, D7 T3 तदा (for अथ). —b) B1 दुरात्मना; B3 [उ]त्तर वच , D7 तत-श्चर° , G2 [उ]त्तम वच (for [उ]त्तमश्वर) Ñ B3 चरैश्च सहितस्तु(B3 °तैश्च) तैः; V3 राव*****श्वर . —c) D3 एवं (for इदं). —d) Ś Ñ V B D0-4 8 12 13 -ससदि (for -संनिधौ).

अथर्क्षरजसः पुत्रो युधि राजन्सुदुर्जयः ।
गद्गदस्याथ पुत्रोऽत्र जाम्बवानिति विश्रुतः ॥ २०
गद्गदस्यैव पुत्रोऽन्यो गुरुपुत्रः शतक्रतोः ।
कदनं यस्य पुत्रेण कृतमेकेन रक्षसाम् ॥ २१
सुषेणश्चापि धर्मात्मा पुत्रो धर्मस्य वीर्यवान् ।
सौम्यः सोमात्मजश्चात्र राजन्दधिमुखः कपिः ॥ २२
सुमुखो दुर्मुखश्चात्र वेगदर्शी च वानरः ।
मृत्युर्वानररूपेण नूनं सृष्टः स्वयंभुवा ॥ २३
पुत्रो हुतवहस्याथ नीलः सेनापतिः स्वयम् ।
अनिलस्य च पुत्रोऽत्र हनूमानिति विश्रुतः ॥ २४

G 6. 6 0
B 6 30 24
L. 6 6. 23

20 ^{b}) G1 युद्धे (for युधि) D5-7 G2 3 M3 Cv r m g राजा (for राजन्) ❀ Cg अथेत्युत्तरवचनारम्भे। द्वितीयोऽथशब्द पादपूरणे ❀ —For 20^{ab}, Ś Ñ V B D0-4 8 12 13 subst

439* ऋक्षराजस्य पुत्रोऽत्र राजा राज्ञा सुदुर्जय ।

[D3 [ऽ]य, D8 13 वै (for ऽत्र) D1 ऋक्षराजपतिर्योऽत्र (for the prior half) —Ñ1 om (hapl) from राजा up to 20^{c} Ñ2 illeg for the post half V2 B महाप्राज्ञ, V3 illeg, D1 राज्ञामति-, D2 राजन्नाज्ञा (for राजा राज्ञा) D3 दुरासद (for सुदुर्जय).]

—After 20^{ab}, D6 ins

440* सुग्रीव इति विख्यातो लोके सूर्यात्मज प्रभु ।

—Ñ2 G3 om (hapl) 20^{cd} —^{c}) D5 6 T1 2 [ऽ]सौ, D7 वै (for ऽत्र) Ś V B D0-4 8 12 13 पितामहसुतश्चात्र (B1 3 °थ, D13 °ह [sic]) —After 20, S V B1 2 4 D0-4 8 12 13 ins, B3 ins after 16

441* सहस्राक्षसुत श्रीमान्सुग्रीवो वानरेश्वर ।
राक्षसानामभावाय सबल समुपस्थित ।

[(1 1) V3 illeg for the prior half B1 चात्र, D2 धीमान् (for श्रीमान्). B1 जाम्बवानिति विश्रुत (= 20^{d}) (for the post half)]

—Thereafter, B1 2 cont, Ñ1 ins after 20, Ñ2 (owing to om) B3 ins after 439*

442* चालिनश्च सुतो वीर शत्रूणा सुदुरासद ।

[B1 चात्र (for वीर). B1 2 म दुरासद]

—Thereafter, B3 cont 445*

—After 441*, B3 cont 437* (followed by st. 13 in marg)

21 B4 D0 1 3 4 om 21 V om. 21^{ab} —^{a}) D7 9-11 [अ]थ, G1 च, G2 [इ]त्र (for [ए]व) —For 21^{ab}, Ś Ñ B1 2 3 (subst and cont after 442*) D2 8 12 13 subst

443* अङ्गदो युवराजश्च तारापुत्र शतक्रतो ।

[Ñ2 B2 3 तु (for च) Ñ B1-3 तारेयोऽत्र (B3 °यश्च) महाबल (for the post half)]

—B1 om. 21^{cd}. V2 reads 21^{cd} after 24. —^{cd}) G1 घोरेण, Cm g t as in text (for नृकेन) Ñ1 V2 3 B2 7 कृतमेकेन यस्य पुत्रेण (by transp), Ñ2 कृतमेकेन वायुपुत्रेण —After 21, V3 reads 25^{ab}

22 ^{ab}) Ś Ñ2 V2 B1 2 4 D2-4 7-13 G3 M1 2 5 चात्र, Ñ1 B3 नाम, G2 चाथ (for चापि). M1 2 बलवान् (for धर्मात्मा) —Ñ2 illeg for ^{b} Ñ1 V2 B धन्वन्तरेर्बली (for धर्मस्य वीर्यवान्) D1 धन्वन्तरिसुत· श्रीमान्सुषेणश्च महाबल . —V2 illeg for ^{cd} —^{c}) Ś D8 इह·, V1 तथा, V3 D0 4 12 13 दक्ष, D1 राजा, D3 5-7 11 T सौम्य-, M1 2 वीर (for सौम्य·) D3 सौमात्मजश्, D11 सौम्यात्मजश् V1 3 श्रीमान्, D1 चापि, D3 M5 चैव (for चात्र) —^{d}) Ś V3 D3 8 12 13 G2 राजा, Ñ B3 नाम्ना (for राजन्) V3 illeg for दधिमुख कपि Ś Ñ B D3 4 6 8 12 13 T2 3 M1 2 हरिः (for कपि).

23 ^{a}) Ś V2 3 D0 2 4 8 12 13 विमुखश् (for दुर्मुखश्) Ś1 Ñ2 V1 2 B1 2 4 D0-4 8 12 13 [ए]व (for [अ]त्र). —V2 illeg for 23^{c} - 24^{b} —^{a}) Ñ B1 3 स्वय (for नून). Ś D0 2-4 8 12 तनुमेका (D0 2 4 °पा, D3 °ता) प्रवेशित, V1 3 तत्त्वमेषा प्रवेशित (V3 प्रोजत [sic]), B2 4 D13 तनु ते (B2 °नु चे)षा प्रवेशित·, D1 तनु चैषा प्रविश्यते —After 23, Ś V1 3 B1 2 4 D0-4 8 12 13 ins

444* स्वयंभुवा महाराज मृत्यो पुत्राश्च ते स्मृता ।

[V3 महाबला, B1 पञ्च चात्र, B2 स्वायंभुव, D1 13 °भुवो, D3 स्वाय° (for स्वयंभुवा). B2 महाबाहु D4 °भागा (for °राज) V1 B1 2 4 मृत्यु- (for मृत्यो) S2 समता (for ते स्मृता)]

24 V2 illeg for 24^{ab} (cf v l 23). Ñ1 om 24^{a} - 25^{b}. B3 reads 24 in marg —^{a}) M1 2 [अ]पि (for [अ]थ) Ś Ñ2 V1 3 B D1-3 6 8-13 पुत्रो हुताशनस्यात्र (D6 °थ), D0 4 हुताशनसुतश्चात्र —^{b}) D8 भीम (for नील) —^{c}) Ś Ñ2 V2 3 D0 1 4 5 9-11 13 T1 G तु, D7 [अ]थ (for च) Ñ2 B4 D0 7 [ऽ]थ, G2 [ऽ]भूद् (for ऽत्र) B3 सुतश्चात्र (for च पुत्रोऽत्र) ❀ Cg अनिलस्य पुत्र औरस। पुत्र तत्र तत्र पितृद्वयनिर्देशो बीजत्वक्षेत्रित्वाभ्यामिति मन्तव्यम् ❀ —D1 om. (hapl ?) 24^{d} - 27^{c}. —^{d}) D2 एष (for इति) —After 24, V2 reads 21^{cd}, while B2 repeats erroneously (within brackets) 442* and st 21 (including star passage) and then ins

Arya Research Team

नप्ता शक्रस्य दुर्धर्षो बलवानङ्गदो युवा ।
मैन्दश्च द्विविदश्चोभौ बलिनावश्विसंभवौ ॥ २५
पुत्रा वैवस्वतस्यैते पञ्च कालान्तकोपमाः ।
गजो गवाक्षो गवयः शरभो गन्धमादनः ॥ २६
श्वेतो ज्योतिर्मुखश्चात्र भास्करस्यात्मसंभवौ ।
वरुणस्य च पुत्रोऽत्र हेमकूटः प्लवंगमः ॥ २७
विश्वकर्मसुतो वीरो नलः प्लवगसत्तमः ।
विक्रान्तो वेगवानत्र वसुपुत्रः सुदुर्धरः ॥ २८
दश वानरकोट्यश्च शराणां युद्धकाङ्क्षिणाम् ।
श्रीमतां देवपुत्राणां शेषान्नाख्यातुमुत्सहे ॥ २९
पुत्रो दशरथस्यैष सिंहसंहननो युवा ।
दूषणो निहतो येन खरश्च त्रिशिरास्तथा ॥ ३०
नास्ति रामस्य सदृशो विक्रमे भुवि कश्चन ।
विराधो निहतो येन कबन्धश्चान्तकोपमः ॥ ३१

4+5* केसरी चापि बलवानागतः स्वबलेन वै ।

—Thereafter B2 repeats 21^{c-d}

25 Ñ B3 om. 25^{ab}, D1 om 25 (for Ñ1 D1, cf v l 24) D6 om. 25–27 V3 reads 25^{ab} after 21 —^{a}) G2 वात्र (sic), G3 पौत्र॰, Cr g as in text (for नप्ता) V2 बलवान (for दुर्धर्षो). ❀ Cr g अत्र नप्तृशब्दोऽन्येषामप्यर्थात् पौत्रे वर्तते. ❀ —^{b}) B1 युधि (for युवा). V2 अंगद समरे बली. —^{c}) Ś D2 6 8 द्विविधश् (for °दश) Ś1 Ñ V B D2–4 8 12 13 G [ए]व (for [उ]भौ). —^{d}) Ś Ñ1 V B D2–4 8 12 13 वीरौ तौ (Ñ1 B3 द्वौ वीरा, D4 तावुभा वश्विनी (V B1–3 D2–4.13 °नो ; B4 °न)सुतौ, Ñ2 यौ वीरावाश्विनेयौ.

26 D6 1 om 26 (cf v l. 25 and 24). —^{a}) Ś D8 12 विवस्वतश्च (for वैवस्वतस्य). V1 D7 9–11 T2 3 G1 2 M1.2 5 [अ]थ, V3 [अ]पि, D6 [आ]मन, G3 [ए]ते (for [अ]त्र). —^{b}) Ñ2 कालात्मक॰; D2 कालानल॰ (for कालान्तक॰) Ś D8 12 कालातकयमोपमा, V2 3 पञ्च तस्यो V2 कालो)पमा स्मृता॰ —^{c}) Ñ2 B1 3 4 गयो (for गजो) Ś D8.12 13 T3 शरभ, D4 ऋषभ॰ (for गवय॰). —^{d}) Ś D8 12 13 T3 ऋषभो (for शरभो).

27 D6 om. 27, D1 om 27^{abc} (cf v l. 25 and 24). Ñ1 D6–7 9–11 S read 27–28 (including star passages) (Ñ1 om 28) after 33 B3 reads 27 in marg V2 illeg for ^{a} —^{a}) D8 श्वेत॰ (for श्वेतो) Ś D8 12 ज्योतिर्मुखश्च, Ñ2 हविर्मुखश्च, D13 दधिमुखश्च, (for ज्योतिर्मुखश्च) —^{b}) Ś V1 3 D2–4.8 12.13 [आ]त्मजावुभौ, V2 सुतावुभौ, B3 [आ]त्मसभव (for [आ]त्मसभवा) Ñ1 B1 भास्करात्मजसभव॰ —^{c}) Ñ2 B2 D4 तु, B3 D5 9–11 G2 [अ]थ (for च) Ñ V2 3 B1 2 4 D2–4 M1 2 [ऽ]त्र, M3 [ऽ न्यो (for ऽथ). Ś D8 12 [आ]त्मजश्चात्र, D13 सुतश्चात्र (for च पुत्रो ऽथ). —^{d}) Ś Ñ2 V B1 2 4 D1–4 8 12 13 प्लवगवान (for प्लवगम) —After 27, Ñ1 ins 450*

28 Ñ1 (om 28) D6–7.9–11 S read 27–28 (including star passages) after 33 —^{a}) Ś Ñ2 V B D0–4 8 12 13 चात्र (for वीरो). —^{b}) Ś Ñ2 V B D0–4 8. 12 13 नलो नाम महाकपिः (V3 °बल) —^{c}) D9 विभ्राजो (for विक्रान्तो) D6–7 1 G2 M1 3 बलवान (for वेगवान). G3 अत्र (for अत्र) —^{d}) D6 7 10 T3 M6 स (for सु). D9 सुपर्ण (for सुदुर्धर).—For 28^{c-d}, Ś Ñ2 V B D0–4 8 12 13 subst

446* येन सेतुर्महान्बद्धः सागरे वरुणालये ।

[B1 सलिलांतरे, B3 सलिलाशये, B4 सलिलार्णवे (for वरुणालये)]

—Thereafter, B3 reads 33^{ab}

29 ^{a}) T3 कोटी (for -कोट्यश्) Ś V1 B1.2 4 D0–8 12 T1 3 G2 M1 2 6 [ऽ]त्र, Ñ B3 तु (for च . ❀ Cv वानरकोट्य इति। अस्मामनिर्देशोऽयम्। वानर वानराणाम्। सुपा सुलगिति षष्ठ्या लुक्। , so also Cr m g t. ❀ —^{b}) D2 -कारिणा (for -काङ्क्षिणाम्) —^{c}) D3 शूराणा (for श्रीमतां). T1 रूपाणा (for -पुत्राणा) —^{d}) Ñ2 V B2 D0–4.6 9–11 G1 M3 शेष, D12 शोध्यान् (sic) (for शेषान्). T3 तेषा नाख्यातुमुत्सहे.

30 B3 reads 30^{ab} in marg —^{a}) Ś Ñ2 V B D0–4 8 12 13 [अ त्र, M6 [ए]व (for [ए]ष). —^{b}) D4 सिंह (for सिंह-) D8 9 सिंहाननो —^{c}) D6 T2 च हतो (for निहतो) G3 दूषणो येन निहतो. —B1 om (hapl) from 30^{d} up to the prior half of l 1 of 447*. D9 om (hapl) 30^{d} – 31^{c} —^{d}) Ñ1 B3 खरोथ, D11 दूषणे (for खरश्च) D2 त्रिशिरस्, D4 त्रिशरास् (for त्रिशिरास्) —After 30, Ś V B1 4 D0–4 8 12 13 read 447*, while B2 ins 448*

31 B1 om up to the prior half of l 1 of 447*, D9 om 31^{abc} (for both, cf v l 30). —^{a}) Ñ1 B3 D1 4 रामेण (for रामस्य). —^{b}) Ś V D0–4 8 12 13 विक्रमेण तु, G1 3 विक्रमेभुवि (for विक्रमे भुवि) D3 कर्हिचित् (for कश्चन) —After 31^{ab}, B1 ins 448*, while B3 reads 32 (followed by 449*) —^{d}) Ñ B3 चामरोपम॰ (for चान्तको॰) —For 31^{c-d}, Ś V B1 4 D0–4 8 12 13 subst and read after 30, B2 subst and cont. l 1 after 448* and reads l 2 after 31^{ab}.

447* वाली च निहतो येन कबन्धश्च महाबल ।
विराधश्चैव दुर्धर्षो राक्षसोऽनन्तविक्रम. ।

चक्रुं न शक्तो रामस्य नरः कश्चिद्रणान्तिकौ ।
जनस्थानगता येन तावन्तो राक्षसा हताः ॥ ३२
लक्ष्मणश्चात्र धर्मात्मा मातंगानामिवर्षभः ।
यस्य बाणपथं प्राप्य न जीवेदपि वासवः ॥ ३३

राक्षसानां वरिष्ठश्च तव भ्राता विभीषणः ।
परिगृह्य पुरीं लङ्कां राघवस्य हिते रतः ॥ ३४
इति सर्वं समाख्यातं तवेदं वानरं बलम् ।
सुवेलेऽधिष्ठितं शैले शेषकार्ये भवान्गतिः ॥ ३५

G. 6. 6.
B. 6. 30. 3
L. 6. 6. 3

इति श्रीरामायणे युद्धकाण्डे एकविंशतितमः सर्गः ॥ २१ ॥

[B1 om the prior half of l 1 —(l 1) D6 विनिहतो (for च नि°) —(l 2) B2 महाबीर्यो (for [ए]व दुर्धर्षो) D13 [स]मिनविक्रम V1 2 B4 राक्षसातकविग्रह , B1 2 राक्षसांतकविक्रम (for the post half)]

—After 31, B3 ins 448*.

32 B3 (marg.) reads 32 after 31^{ab} —^{a}) Ś B3 4 D0 1 3–5 8 12 13 न शक्यो, G शक्तो न (by transp) —^{b}) Ś V D0–1 8 12 विक्रमे(Ś D0 3 8 °म) सदृशो भुवि, B कथंचित्सदृश क्षि(B1 ग)तौ, D7 9–11 G M5 गुणान्कश्चिन्नर (by transp)क्षितौ, D13 विक्रमोनसदृशो भुवि. —^{c}) D4 6 13 ये च (for येन) —^{d}) Ś V1 D0–2 4 8 12 13 वनस्था, B1.2 D3 वनाते, B3 तावत्तु, D5 6 9 [2 3 M यावतो, G1 तावका (for तावन्तो) B4 राक्षसास्ते बलाहता —For 32, Ñ subst , B1 ins after 31^{ab}, B2 ins after 30, B3 ins after 31

448* सेतुर्यद्धश्च रामेण को राममदृशो भुवि ।

—Thereafter, B2 reads l 1 of 447*

—After 32, Ś V2 3 B D0–4 8 12 13 ins

449* एष त्वा समरे जेतुमुद्यत सगणो बली ।

[V3 D0–3 सेष (for एष) Ś D12 त्वा (for त्वा) B2 3 सगण (for समरे) Ś V2 3 D0 4 8 12 13 योद्धुम् (for जेतुम्). Ś D8 12 सुमहाबल , V3 सबलो बली, D13 सहसा बली (for सगणो बली)]

33 B3 reads 33^{ab} after 446* —^{a}) Ñ1 B3 D0 1 4. 6 7 T2 [अ]पि, D2 [ए]व (for [अ]त्र) —B3 om 33^{cd}. —^{c}) Ñ1 प्राप्तो (for प्राप्य) —^{d}) Ñ1 जीवेदपि न (by transp) —After 33, Ñ1 (om 28) D5–7 9–11 S read 27–28 (including star passages).—After 33, Ñ2 ins., Ñ1 ins after 27

450* सर्ववानरमुख्यश्च सुग्रीव प्लवगर्षभ. ।;

while, D1 ins after 33

451* मार्गते राघवस्याज्ञा निहन्तुं सर्वराक्षसान् ।
न चैव राघवस्यार्थे जीवित परिरक्षति ।

34 ^{a}) D9 गच्छमाणां (corrupt) (for राक्षसा) Ñ B3 प्रधानश्च, T3 गरिष्ठश्च (for वरिष्ठश्च) —^{b}) V2 भ्राता तव (by transp.) —^{c}) Ñ V2 3 B2 3 D6 7 9–11 T2 3 G1 3 M1 2 प्रतिगृह्य, B1 प्रतिलभ्य, D0 3 4 °त्यज्य (for परिगृह्य). —^{d}) Ñ1 स्थित (for रत) —After 34, D1 ins

452* गतमात्रोऽसिपिक्तस्तु लङ्कायां राघवेण तु ।

35 ^{a}) D0 इदं (for इति) D2 समाख्यातं (for समा°) —^{b}) Ś1 V2 D0 2 7 G2 M1 2 5 तदेव, Ñ B3 तव वै, V1 3 तदेव, B2 तदेतद्, D8–11 तथा वै (for तवेद). Ś V B1 2 4 D0–3 8 12 13 क्षिप्ता, Ñ B3 शाखव (for वानर) —^{c}) Ñ V1 B1 3 4 D5 7 G1 3 M1 2 विष्ठित, D6 12 1 निष्ठित (for ऽधिष्ठित) —^{d}) Ś2 Ñ1 B2–3 D0–3 9 12 शेषे (for शेष-). Ñ1 [स]क्षोभ्या, B3 काले (for -काय) ❀ Cg अत्र वानरजन्मोक्ते प्रायशो बालकाण्डोक्तविरोधादेतत्सर्गं विनापि पूर्वोत्तरकथासङ्घट्टनाच्च सर्गोऽयं कल्पित इत्याहु . ❀

Colophon —*Kāṇḍa name* Ñ B D2 13 लङ्काकाण्डे, D0 4 सुंदरकाण्डे —*Sarga name*. Ś V1 2 D1 2 9 12 चारप्रत्यागमन(Ś2 D8 °गम, V2 °न , D1 °गम), Ñ V3 B3 4 D9 शार्दूलवाक्य, B1 शार्दूलवचन, B2 वानरप्रणीतो शार्दूलवाक्य, D0 चारवाक्य, D3 चारप्रव्याप्त, D4 लङ्कापर्वणि चारवाक्य, D13 चरप्रत्यागमनवाक्य.—*Sarga no* (figures, words or both) Ś1 Ñ1 B2 D0 2 4 12 13 om , Ś2 Ñ2 V B3 4 D3 9 6, B1 D8 5, D1 8, D5–7 10 11 T1 3 G M 30, T2 29 —After colophon, G M1 2 conclude with श्रीरामाय नमः .

२२

ततस्तमक्षोभ्यबलं लङ्कायां नृपतेश्वराः ।
सुवेले राघवं शैले निविष्टं प्रत्यवेदयन् ॥ १
चाराणां रावणः श्रुत्वा प्राप्तं रामं महाबलम् ।
जातोद्वेगोऽब्रवीत्किंचित्सचिवांश्चेदमब्रवीत् ॥ २
मन्त्रिणः शीघ्रमायान्तु सर्वे वै सुसमाहिताः ।
अयं नो मन्त्रकालो हि संप्राप्त इति राक्षसाः ॥ ३

तस्य तच्छासनं श्रुत्वा मन्त्रिणोऽभ्यागमन्द्रुतम् ।
ततः संमन्त्रयामास सचिवैः राक्षसैः सह ॥ ४
मन्त्रयित्वा स दुर्धर्षः क्षमं यत्समनन्तरम् ।
विसर्जयित्वा सचिवान्प्रविवेश स्वमालयम् ॥ ५
ततो राक्षसमाहूय विद्युज्जिह्वं महाबलम् ।
मायाविदं महामायः प्राविशद्यत्र मैथिली ॥ ६

22

1 G (ed) om 1 —^{a}) Ñ$_2$ D$_{5\,7\,9}$ T$_1$ तद्; Cr k as in text (for तम्) & Cr ततस्तमक्षोभ्यबलमित्ययमनुवाद पूर्वसर्गादौ च कृत'। पूर्वमेव मया सृष्टो जाम्बवानृक्षपुङ्गव'। जृम्भमाणस्य सहसा मम वक्त्राद्व्यजायत। इति जृम्भमाणपितामहवक्त्राद्व्युत्पन्नत्वेन प्रसिद्धस्य जाम्बवत पूर्वसर्गे गद्गदपुच्छत्वेनाभिधानाद्विरोध स्फुरति। पूर्वसर्गान्तरेणापि कथा च न(?) सङ्गच्छत। तथापि स्थितस्य गतिश्चिन्तनीयेति न्यायेन पूर्वसर्गो व्याख्यात & —^{b}) M$_{1\,2}$ लंकाया Ś D$_{8\,12}$ राक्षसाधिपतिं चरा', Ñ V B D$_{0-6\,12}$ T G$_2$ M$_3$ लंकाधिपतये चरा'. —Ñ$_2$ illeg for ' —^{c}) D$_{8\,12}$ स्वबेले. V$_2$ [s]विष्टितं (for राघवं) —^{d}) B$_1$ वेष्टित, D$_3$ तिष्ठंतं (for निविष्ट).

2 ^{a}) Ś D$_{0-4\,8\,9\,12\,13}$ चारेभ्यो, Ñ V$_{2\,3}$ B$_{1\,3\,4}$ चरेभ्यो; V$_1$ सुवेल. T$_3$ चराणा, Cm g as in text (for चाराणां) —^{b}) D$_6$ प्राप्त- D$_{1.6}$ T$_{2\,3}$ G$_1$ राम-. B$_2$ $_4$ transp प्राप्त and राम N B सलक्ष्मण, T$_{2\,3}$ G$_1$ -बल महत्, G (ed) च लक्ष्मण (for महाबलम्) —^{c}) Ś Ñ$_1$ V$_2$ B$_4$ D$_{0\,2\,4\,8\,12\,13}$ -[आ]याचो, Ñ$_2$ V$_{1\,3}$ B$_{1\,3}$ D$_2$ -त्रामो, B$_2$ -क्रोवो (for -[ड]द्वेगो) D$_0$ [s]ब्रवीत्, D$_7$ भयात् (for sभवत) —^{d}) D$_3$ राक्षसाश्च, G$_1$ सचिवं, Cr.t as in text (for सचिवाश्च) V D$_{0-2\,4\,5\,7\,9-11\,12}$ T$_1$ G$_3$ M$_3$ Cv इदम् (for चेदम्). Ñ B सचिवानपि चाह्वयत्

3 Ñ B om 3 —^{a}) D$_3$ अभ्याम (for आयान्तु) Ś D$_{0\,4\,8\,12}$ श्रीमतो मन्त्रिणोभ्यायो(D$_{0.4}$ °भ), V D$_{1\,2}$ मन्त्रिण श्रीमतो(V$_1$ * * * [illeg])भ्याम, D$_{13}$ श्रीमंतोभ्यामायातु —^{b}) D$_{13}$ मन्त्रिण, M$_5$ सर्वे ते (for सर्वे वै) Ś V D$_{0-2\,4\,8\,12}$ म (Ś D$_8$ म मायातु समाहिता, D$_2$ समायातु त्वरान्विता —G$_2$ om 3^c – 5^a. D$_6$ reads 3^{cd} on marg. —^{c}) Ś V D$_{0-4\,8\,10\,11}$ आमन्त्रो, D$_6$ अय नु (for अय नो). D$_4$ [s]य (for हि) —^{d}) M$_{1\,2}$ इह (for इति) Ś V D$_{0-4\,8\,12\,13}$ समासा स्थितो(V$_2$ चारयो) मम

4 G$_2$ om 4 (cf v l 3) —^{a}) D$_6$ तच्च (for तस्य) —^{b}) Ś Ñ V$_1$ B$_{1-3}$ D$_{2\,12}$ [s]न्यागता, D$_0$ [s]भ्यागयन् G$_{1\,3}$ तत्रा (for द्रुतम्) B$_4$ मंत्रिणो वाक्यमब्रुवन्. —After 4^{ab}, Ś V$_2$ D$_{2\,4\,8\,12\,13}$ ins , while Ñ B subst. for 4^{cd} :

453* शिरसा तं प्रणम्याथ तस्थु' प्राञ्जलयोऽग्रत ।

[Ñ$_2$ illeg for the prior half. B$_3$ शिरोभिस् (for शिरसा) Ñ$_1$ V$_2$ [अ]ति-; B$_{1\,2\,4}$ च, B$_3$ ते, D$_{2\,4}$ [अ]मि (for त) Ñ$_1$ B$_{3.4}$ D$_2$ [अ]स्य (for [अ]ग) D$_2$ स्थिता, D$_{13}$ स्थिता (for तस्थु) D$_2$ तत , D$_{13}$ यत (for sग्रत).] —Thereafter B$_2$ cont

454* एष दाशरथी राम' सबलस्तु समीपत'।
अप्रमत्तैश्च वो भाव्यं प्रभात इह चेष्यति।

—^{c}) Ś$_1$ V D$_{0\,1\,3-7\,9-11\,13}$ T$_{2\,3}$ M म मन्त्रयामास, D$_2$ सचितयामास (for समन्त्र'). —^{d}) Ś V D$_{0-4\,8\,12\,13}$ सचिवैः सह रावण , D$_{7\,9-11}$ राक्षसं सचिवैः सह, G$_{1\,3}$ M$_5$ सचिवैः सह(G$_1$ °वैस्तत्र) राक्षसं.

5 G$_2$ om. 5^{ab} (cf v l 3) —^{ab}) Ś$_1$ D$_{0\,5-12}$ M$_{1\,2\,5}$ तु, Ś$_2$ V$_3$ D$_{1\,2\,4\,13}$ च, V$_1$ T G$_{1\,3}$ सु (for स). D$_3$ transp मन्त्रयित्वा and स Ś D$_8$ दुर्धर्षो , D$_4$ T$_3$ दुर्धर्षं V$_2$ D$_3$ क्षण यत्; D$_0$ G$_1$ क्षेम यत्, D$_{13}$ समयत् (sic) (for क्षमं यत) V$_3$ D$_{7\,9-11}$ तदनंतर Ñ V$_2$ B स मन्त्र(G [ed] सचिव)यित्वा (V$_2$ मन्त्रयित्वा च) निपुण (B$_4$ विपुल) निश्चित्य च बलाबलं(B$_{1\,2}$ महाबल). —B$_3$ reads 5^c – 6^b in marg —^{c}) B$_{2\,4}$ बलवान्, D$_3$ तान्सर्वान् (for सचिवान्). N B$_{1\,3}$ विसृज्य सचिवांश्चैव. —^{d}) Ś D$_{8\,12}$ आविवेश (for प्रवि°). V$_3$ नृपालयं

6 B$_3$ reads 6^{ab} in marg (cf v l 5) —^{a}) Ś D$_{0-2\,8\,12}$ G$_{1\,3}$ आनाय्य, B$_{2\,4}$ आमन्य, D$_{3\,4}$ आमाद्य, D$_{7\,10\,11}$ T$_{2\,3}$ G$_2$ M$_{1\,2\,5}$ आदाय, D$_9$ प्रादाय, D$_{13}$ आनीय (for आहूय) B$_1$ स्तो राक्षसश्रेष्ठं —V D$_{1\,3}$ om. 6^{cd} —^{c}) Ñ B D$_{0\,2\,4\,10\,11}$ T$_2$ G$_3$ M$_5$ Ck t मायाविन, D$_{13}$ महाबल (for मायाविद) Ñ$_1$ महामात्र, Ñ$_2$ B$_2$ D$_{10.11}$ M$_5$ Ck t महामाय, B$_{1\,3\,4}$ °काय, D$_{0\,2\,4\,12}$ °घोर, D$_6$ °काय' (for महामाय) Ś D$_{8\,12}$ महाघोर प्रविश्याथ —^{d}) Ś D$_{8\,12}$ न्यवसद्, D$_9$ T$_2$ G$_2$ प्रविशद् D$_{13}$ चैव मैथिलीं (for यत्र मैथिली)

Arya Research Team

विद्युज्जिह्वं च मायाज्ञमब्रवीद्राक्षसाधिपः ।
मोहयिष्यामहे सीतां मायया जनकात्मजाम् ॥ ७
शिरो मायामयं गृह्य राघवस्य निशाचर ।
मां त्वं समुपतिष्ठस्व महच्च सशरं धनुः ॥ ८
एवमुक्तस्तथेत्याह विद्युज्जिह्वो निशाचरः ।
तस्य तुष्टोऽभवद्राजा प्रददौ च विभूषणम् ॥ ९

अशोकवनिकायां तु प्रविवेश महाबलः ।
ततो दीनामदैन्यार्हां ददर्श धनदानुजः ।
अधोमुखीं शोकपरामुपविष्टां महीतले ॥ १०

भर्तारमेव ध्यायन्तीमशोकवनिकां गताम् ।
उपास्यमानां घोराभी राक्षसीभिरदूरतः ॥ ११

G 6 7 11
B 6 31 13
L. 6 7 9

7 ^{a}) Ñ V$_2$ B$_{1\,3}$ तमागत (for विद्युज्जिह्व) Ś D$_8$ तदानी स, Ñ V$_2$ B$_3$ महामायम्, B$_1$ महाकायम्, D$_0$ तदानीय, D$_2$ तदानी तम्, D$_4$ तदाहूय, D$_5$ च माया हम् (sic), D$_{11}$ त्वमायाज्ञम्, D$_{12\,13}$ तदानीं च, G$_2$ च मायार्थम्, G$_3$ illeg (for च मायाज्ञम्) V$_{1\,3}$ D$_{1\,3}$ मायाविन महामायम् (D$_3$ °बाहुम्) —^{b}) Ś V D$_{0\,4\,8\,12\,13}$ प्रा(V अ)ब्रवीद्राक्षसेश्वर —^{c}) Ñ V$_{2\,3}$ B$_{1-3}$ मोहयिष्याम्यह, D$_{1\,4\,5\,9\,10}$ T$_1$ G$_1$ M$_3$ Ct मोहयिष्यावहे, D$_{11}$ मोहयित्वा वहेत् (sic), Ck. मोहयिष्यामहे (as in text)

8 ^{a}) Ñ B$_3$ कृत्वा (for गृह्य) ❀ Cg गृह्य गृहीत्वा ❀ —^{b}) Ñ B$_{1\,3}$ मुहूर्तेन, B$_{2\,4}$ मुहूर्तं त्व (for राघवस्य) —For 8^{ab}, Ś V D$_{0-4\,8\,12\,13}$ subst

455* मायामय रामशिरो गृहीत्वा राक्षस क्षणात्।

[D$_{13}$ राक्षसाद् (for राक्षस) V D$_2$ [अ]च्छुत, D$_{1\,3}$ द्रुत, D$_4$-[ऋ]षभ, D$_{12\,13}$ गणात् (for क्षणात्)]

—^{c}) D$_{9\,13}$ मा. Ñ$_1$ B$_3$ D$_8$ M$_3$ transp मा and त्व Ś D$_{8\,12\,13}$ समनुतिष्ठेथा, Ñ$_1$ V B$_3$ D$_{0-4}$ समुपतिष्ठेथा —^{d}) D$_{1\,3}$ गृहीत्वा, G M$_5$ प्रगृह्य (for महच्च)

9 L (ed) transp ^{ab} and ^{cd} —^{a}) Ñ$_1$ B$_2$ G$_1$ [उ]क्त्वा (for [आ]ह) —^{b}) D$_2$ G$_2$ महाबल· (for निशाचर) —After 9^{ab}, Ñ V$_2$ B$_{1-3}$ D$_{6\,7\,9-11}$ T$_2$ ins

456* दर्शयामास ता माया सुप्रयुक्ता स रावणे।

—Thereafter D$_6$ cont·

457* तथैव कृत्वा तत्सर्वं रावणाय न्यवेदयत्।

—^{c}) Ś V$_1$ D$_{0-4\,8\,12\,13}$ तस्मै (for तस्य) —^{d}) Ś V D$_{0-4\,8\,12\,13}$ अथ भूषण, D$_7$ वरभूषण, G M$_5$ त्व विभूषण

10 Ś B$_4$ D$_{0\,1\,8\,9\,12\,13}$ om 10^{ab} —^{a}) D$_{7\,10\,11}$ T$_3$ च (for तु) D$_{3\,4}$ वनिका चापि —After 10^{a}, D$_{3-7\,10\,11}$ S ins

458* सीतादर्शनलालस ।
नैर्ऋतानामधिपति

—^{b}) D$_{3\,5-7\,10\,11}$ T G M$_{1-3}$ स- (for प्र-) G$_1$ महद्वनं, G$_2$ M$_5$ महावन (for महाबल) —For 10^{ab}, Ñ V B$_{1-3}$ D$_2$ subst

459* सप्रविष्टो विवेशाथ अशोकवनिका शुभाम्।

[Note hiatus between the two halves Ñ$_1$ V$_1$ B$_3$ D$_2$ सप्रहृष्टो, V$_{2\,3}$ स प्रविष्टो (for सप्रविष्टो) D$_2$ (to avoid hiatus) त्रशोक-]

—^{c}) Ś D$_{3\,8\,12}$ अदीनागीं, Ñ$_1$ अनन्याहां, Ñ$_2$ V B D$_{0\,1\,4\,7\,9\,10}$ G M$_{1\,2\,5}$ अदीनाहां, D$_2$ सुमलिना, G (ed) अनहां ता (for अदैन्याहां) D$_{11}$ ततो दीना महादीना (sic) —^{d}) Ñ V$_2$ B$_{1\,3}$ जनकात्मजा (for धनदानुज) —Ś Ñ V B D$_{0-4\,8\,12\,13}$ read 10^{ef} after 12, G$_{1\,2}$ (after 12^{ab} [r]) repeat 10^{ef} after 12^{ab}, M$_5$ repeats 10^{ef} after 461* —^{e}) M$_5$ (second time) अधोमुख-. Ś V D$_{0-4\,8\,12\,13}$ G$_{1\,2}$ M$_5$ (G$_{1\,2}$ M$_5$ second time) स्थितां बालाम् (for शोकपराम्) Ñ B अधोमुख (B$_3$ om [hapl] मुख) मुखीं बालाम् —^{f}) Ś$_1$ D$_{8\,12}$ उपासीना, Ś$_2$ उदासीनां (for उपविष्टा) Ś Ñ V B D$_{0\,2-4\,8\,12\,13}$ G$_{1\,2}$ M$_5$ (G$_{1\,2}$ M$_5$ second time) पराङ्मुखी, D$_1$ अधोमुखीं (for महीतले). —After 10, Ñ V$_{2\,3}$ B$_{1-3}$ D$_2$ ins

460* यथा यथा सान्त्वयिता वश्य स्त्रीणा तथा तथा।
यथा यथा प्रिय वक्ता परिभूतस्तथा तथा।
सनियच्छाम्यह सीते त्वयि क्रोध समुत्थितम्।
द्रवतो दुर्गमासाद्य हयानिव सुसारथि·।

[V$_3$ om 1 1-3 Ñ$_1$ V$_2$ B$_1$ om (hapl.) 1 2. —(1. 2) B$_3$ परिरक्ता (for °भूतस्) —(1 3) Ñ$_1$ V$_2$ यन्नियच्छामि —D$_2$ om 1 4 —(1 4) Ñ$_2$ गच्छतो (for द्रवतो) V$_3$ भयम् (for दुर्गम्) B$_1$ आस्थाय (for आसाद्य) V$_3$ च (for सु-)]

11 ^{a}) V D$_{0\,1\,3\,4\,9\,10}$ समनुध्यातीम् (V$_3$ °ध्याताम्), B$_1$ D$_{2\,11\,13}$ °अनुध्यायतीम् (for एव ध्यायन्तीम्) Ś D$_{8\,12}$ चिंतयतीं स्वभर्तारम्, Ñ B$_{2-4}$ ध्यायती तत्र भर्तारम् —^{b}) B$_{1\,2}$ D$_{0\,1}$ -वनिकागता —^{c}) V$_{1\,2}$ भीमाभी (for घोराभी) —^{d}) D$_{3\,4}$ समतत, D$_5$ T$_1$ M$_3$ इतस्तत, D$_7$ G$_1$ उपद्रुता (for अदूरत) —After 11, G$_1$ M$_3$ ins, while G$_2$ ins. after 12^{ab} (first occurrence), M$_5$ ins after 12^{ab}

461* राक्षसीभिर्वृता सीता पूर्णचन्द्रनिभाननाम्।
उत्पातमेघमालाभिश्चन्द्रलेखामिवावृताम्।
भूषणात्ययवै कैश्चिन्मङ्गलार्थमलकृताम्।
वमन्ते मारुतोद्धूता क्लिष्टपुष्पा लतामिव।
हर्षशोकान्तरे मग्ना विषादास्राविलेक्षणाम्। [5]
स्तिमितामतिगाम्भीर्यान्नदीं भागीरथीमिव।

Arya Research Team

11 उपसृत्य ततः सीतां प्रहर्षन्नाम कीर्तयन् ।
13 इदं च वचनं धृष्टमुवाच जनकात्मजाम् ॥ १२
10 सान्त्व्यमाना मया भद्रे यमुपाश्रित्य वल्गसे ।
खरहन्ता स ते भर्ता राघवः समरे हतः ॥ १३
छिन्नं ते सर्वतो मूलं दर्पस्ते निहतो मया ।
व्यसनेनात्मनः सीते मम भार्या भविष्यसि ॥ १४
अल्पपुण्ये निवृत्तार्थे मूढे पण्डितमानिनि ।
शृणु भर्तृवधं सीते घोरं वृत्रवधं यथा ॥ १५
समायातः समुद्रान्तं मां हन्तुं किल राघवः ।
वानरेन्द्रप्रणीतेन बलेन महता वृतः ॥ १६
संनिविष्टः समुद्रस्य तीरमासाद्य दक्षिणम् ।
बलेन महता रामो व्रजत्यस्तं दिवाकरे ॥ १७
अथाध्वनि परिश्रान्तमर्धरात्रे स्थितं बलम् ।
सुखसुप्तं समासाद्य चारितं प्रथमं चरैः ॥ १८

[(1 2) M3 -जालामिश् and -रेखाम् (for -मालाभिश् and -रेखाम् respy) —(1 3) M3 भूषणकृत्तम (for भूषणावर्यम्) G2 मगलागम् (for °लार्थम्) —(1 4) M3 चरतीं (for वसन्ते) G2 छिट्टपत्रा, M3 क्षिप्ता पुष्प- (for छिट्टपुष्पा). —(1 5) M3 विषादस्य विलक्षणा (for the post half) —(1 6) M3 इव (for अति-)]

—Thereafter G2 repeats 12^{ab}, while M5 repeats 10^{ef}

12 G2 repeats 12^{ab} (cf v l. 461*) —^{a}) Ñ1 उपामर्षन्, B3 उपामर्षत्, D8 उपसृज्य (for उपसृत्य) —^{b}) Ś V1 3 D0 4-6 8-13 T1 2 M3 Cv m g t प्रहर्षं, M1 2 5 हर्षयन्, Cr as in text (for प्रहर्षन्) Ś D8 12 13 पूरयन्, Ñ1 V1 3 D0 3 4 G2(second time) रूपयन्, D9 कीर्तते (sic) (for कीर्तयन्) Ñ2 V2 B प्रहृष्टो ध(V2 प्रहसन्ध, B1 4 प्रहर्षाद्व, B2 प्राहर्षाद्व)नदानुज , D1 प्रहर्षमनुरूपयन्, D2 प्रहृष्टेनातरात्मना ❀ Ct प्रहर्षं नाम कीर्तयन्। नामेत्यपरमार्थे। अपरमार्थभूतं रामजयज प्रहर्षं कीर्तयन् ❀ —After 12^{ab}, G1 2(after 12^{ab} [r]) repeat 10^{ef}, M5 ins 461* —D9 om 12^{c}–13^{b} —^{c}) Ñ B3 दुष्टात्मा, V B4 D1 इद म (for इद च) Ś V1 2 B2 4 D0–2 13 हृष्ट, Ñ B3 चेदम्, B1 दृष्ट , D1 4 हृष्टम्, D5 6 T2 3 M1 2 दुष्टम्, D8 12 दृष्ट्वा (for दृष्टम्) G M5 transp वचन and दृष्टम् —^{d}) B1 2 4 प्रोवाच (for उवाच) —After 12, Ś Ñ V B D0–4 8 12 13 read 10^{ef}.

13 D9 om 13^{ab} (cf v l 12) —^{a}) Ś1 Ñ2 मान्यमाना, Ś2 Ñ1 D0–4 6 12 13 T2 3 G3 सात्वमाना, V3 सात्वित म (for सान्त्व्यमाना) —^{b}) T2 वर्तसे, Cg as in text (for वल्गसे) Ś D8 12 मामेति प्रतिजल्पसि, Ñ V B D0–4 13 G य(D13 म)माश्रित्य प्रजल्पसि(Ñ2 B4 °जल्पसे, D3 G1 2 °गल्भसे, G3 °वल्गसे), D10 11 यमाश्रित्य विमन्यसे —D8 om 13^{c}–14 —^{c}) D1 च (for स)

14 D8 om 14 (cf v l 13) —^{a}) Ś Ñ V B D0–4 9–13 G1 2 Ct सर्वथा (for सर्वतो) D4 मूल्यं (for मूल) —^{b}) V3 D10 11 च (for ते) K (ed) विहतो (for निहतो) B4 यथा (for मया) —^{c}) D3 व्यसने च (for व्यसनेन) —^{d}) B3 (marg also) D1 भविष्यति —After 14, Ñ2 D5–7 9–11 S ins

462* विसृजेता मतिं मूढे किं मृतेन करिष्यसि ।
भवस्व भद्रे भार्याणा सर्वासामीश्वरी मम ।

[(1 1) D7 9 M1 2 [ष]ना, T1 G1 M3 [ह]मा (for [ष]तां) Ñ2 विसृज्य विमतिं बाले (for the prior half). —(1 2) G2 3 M5 भजस्व (for भवस्व). ❀ Cg भवस्वेत्यात्मनेपदमार्षम् ।, Ct भवस्व। भवेत्यर्थ . ❀ G2 मम (for भद्रे) G (ed) भवस्व भार्या भार्याणा (for the prior half). G2 3 M5 मम (for मम)]

15 ^{a}) Ñ B3 मंदभाग्ये, D0 अल्पपुण्य- (for अल्पपुण्ये) Ñ B निरानंदे, D0 -निमित्तार्थे (for निवृत्तार्थे). ❀ Cg पण्डितमानिनि । "क्वयटमानिनोश्च" इति ह्रस्वत्वम् ❀ —^{cd}) D0 3 4 8 12 भर्तुर् (for भर्तृ-). Ñ1 B D3 G घोर सीते (by transp), D2 घोर घोर- (for सीते घोर) Ś D8 12 घोरो वृत्रवधो यथा, M1 2 घोर वृत्रवधोपम (for ^{d})

16 ^{a}) Ś D8 12.13 उपागत , Ñ V B D1 उपायात , D0 2–4 G3 उपयात , D6 M5 समायाति (for समायात) Ś D0 2 8 12 समुद्राते, M5 समुद्र मा —^{b}) V3 D0–11 हंतु मा (by transp.), T3 महात, M5 निहतु (for मा हन्तु) —G3 om (hapl) 16^{d} – 19^{a}. —^{d}) D1 सैन्येन (for बलेन)

17 G3 om 17 (cf v l 16) —^{a}) B4 विनिविष्ट , D1 6 G1 2 M5 स निविष्ट —^{b}) D0 दक्षिणे B4 तीरे चेप पतिस्तव, D6 7 9–11 T2 3 M3 पीड्य(D6 T2 तीर्त्वा) तीरमयोत्तर —V3 om 17^{c-d} —^{c}) G1 M5 सुमहातेजा (for महता रामो) —^{d}) Ñ1 [अं]त (for [अ]स्त).

18 G3 om 18 (cf v l 16) —^{a}) B2 4 [अ]ध्वना, D0 2 4 13 [अ]ध्वना (for [अ]ध्वनि). D1 अध्वना सपरिश्रातम् ❀ Cg अथेति। कात्स्न्यें अथ शब्द . ❀ —^{b}) B4 रात्र, M5 -रात्रो —V1 om 18^{cd} —^{c}) B2 -प्रसुप्तम्, K (ed) -ससुप्तम् (for -सुप्त सम्-) D1 अनासाद्य —^{d}) Ś1 Ñ2 V2 3 B3 D5 7.10 11 M1.2 Cm g.k t चरित, Ś2 चारित्र, D6 चारित B3 वलै (for चरै).

तत्प्रहस्तप्रणीतेन बलेन महता मम ।
बलस्य हतं रात्रौ यत्र रामः सलक्ष्मणः ॥ १९
पट्टसान्परिघान्खड्गांश्चक्रान्दण्डान्महायसान् ।
बाणजालानि शूलानि भास्वरान्कूटमुद्गरान् ॥ २०
यष्टीश्च तोमरान्प्रासांश्चक्राणि मुसलानि च ।
उद्यम्योद्यम्य रक्षोभिर्वानरेषु निपातिताः ॥ २१
अथ सुप्तस्य रामस्य प्रहस्तेन प्रमाथिना ।
असक्तं कृतहस्तेन शिरश्छिन्नं महासिना ॥ २२
विभीषणः समुत्पत्य निगृहीतो यदृच्छया ।
दिशः प्रव्राजितः सर्वैर्लक्ष्मणः प्लवगैः सह ॥ २३
सुग्रीवो ग्रीवया शेते भग्नया प्लवगाधिपः ।
निरस्तहनुकः शेते हनूमान्राक्षसैर्हतः ॥ २४
जाम्बवानथ जानुभ्यामुत्पतन्निहतो युधि ।
पट्टसैर्बहुभिश्छिन्नो निकृत्तः पादपो यथा ॥ २५

G 6 7 29
B. 6 31. -/
L 6 7 2

19 G1 om 19^{a} (cf v l 16) —^{a}) D9 प्रसह्य (for प्रहस्त) —^{b}) D3 वृत (for मम) —^{c}) Ś Ñ V1 2 B4 D0-4 8 12 अभ्याहत, V3 B1 D13 M2 अभ्यागत, B2 अद्याहत , Cg t as in text (for अस्य हत) —^{d}) Ś2 V1 राजा (for राम) Ś1 V3 D0-4 8 12 13 यत्र राजा(D0 4 सज्ज) स राघव

20 ^{a}) D6 7 9-11 Cg पट्टिशान् , M5 पट्टशान् D5 T1 M1 2 गृह्य, D7 9-11 M3 चक्रान् (for खड्गांश्) —^{b}) D5 T1 M3 दण्डान्, D7 M1 2 खड्गान्, D9 वज्रान्, D10 11 ऋष्टीन् (for चक्रान्). D5 T1 M3 खड्गान् (for दण्डान्) D7 9-11 महायुधान्, G3 महाभयान् (for महायसान्) —For 20^{ab}, Ś Ñ V B D0-4 8 12 13 subst

463* पट्टिशा परिघाश्चैव गदा दण्डा महायसा ।

[D2-4 पट्टिशान् Ñ B3 तोमराश्, D0 2 3 परिघाश् (for परिघाश्) Ś V1 D4 दट (for दण्डा). Ñ B1 3 4 तथायसा , D13 महात्मन (for महायसा)]

—^{c}) D2 बाणपञ्चानि, D3 बलजानि, G2 बाणजातानि D4 शुराणि (sic), D9 मुग्धानि (for शूलानि) ❀ Cg चक्रान् क्षुद्रचक्राणि।, Ct चक्रान् स्वल्पान्। चक्राणीति पुनरुक्ते ❀ —^{d}) Ś Ñ V B D0 1 4 8 13 भास्वरा (D0 4 भल्लाश्च) कूट(D13 क्रूर)मुद्गरा

21 ^{a}) D5 T1 M3 शक्तीश्, Cg as in text (for प्रासाश्) Ś D1-3 8 12 शक्तीश्च तोमराश्चित्राश्(D1 °राश्चात्र), Ñ1 V B D0 4 13 क्षेपण्यस्तो(V1 2 D0 4 शक्त्यष्टितो, V3 शकृस्थो तो, B1 अकुशास्तो, B2 क्षेपणीस्तो, D13 शम्भसस्तो)-मराश्चित्रा(B1 °श्चोग्रा)श्, Ñ2 क्षेपणी शक्तय चित्राश् —^{b}) Ś D8 12 चर्माणि, B1 4 चित्राणि, D7 शस्त्राणि (for चक्राणि) Ś मुसुलानि च, Ñ2 परिवास्तथा, V मुसलास्तथा, M5 विविधानि च (for मुसलानि च) ❀ Cg चक्राणि महाचक्राणि।, Ck चक्राणीति पुनर्ग्रहणात्तस्याप्यवान्तरभेद· . ❀ —After 21^{ab}, Ñ V B1-3 D13 ins

464* कर्परा अङ्कुशा भल्ला कालचक्रा गदास्तथा ।

[B3 कपना, G (ed) कल्पना (for कर्परा) V1 2 कर्पराकुश-भल्लाश्च, V3 कर्परा ज्ञ~शा भता (sic), B1 क्षेपणीमुद्गरा भल्ला (for the prior half) D13 भल्लाकाराश् (for भल्ला काल-) V3 तदा (for तथा)]

—D9 om 21^{c}-22^{b} —^{c}) D7 रक्षोघैर् (for °भिर्) —^{d}) D2 वानराश्च, D3 4 वानरेन्द्रा (for वानरेषु)

22 D9 om 22^{ab} (cf v l 21) —^{a}) T2 तथा (for अथ) B4 शूरस्य (for सुप्तस्य) —^{b}) D5 प्रमत्तेन (for प्रहस्तेन) —^{c}) Ś1 असकृज्जात-, Ś2 V D0 8 12 13 असकृत्कृत , B1 सुदृढं दृढ-, B2 आसक्त दृढ , B4 असिना दृढ-, D1 2 4 असक्त(D2 °क्त)कृत-, D3 असकृत्क्षुर-, T3 असाक्त कृत-, G1 असक्त क्षुर-, G (ed) असकृद्दृढ-, Cm g t as in text (for असक्त कृत-) —^{d}) Ś2 D1 12 महात्मना, B1 भयाकुल, B2 4 जटाकुल (for महासिना)

23 V3 om 23^{ab}. —^{a}) Ś Ñ V1 2 B D0-4 8 12 13 उत्पतस्ता(B1 उत्पत्य ता, B4 उपेतस्ता)डित पृष्ठे —^{b}) Ś V2 D0 2 4 8 12 13 निपतंश्च, D9 निहतश्च (for निगृहीतो) —^{c}) D6 9-11 G3 दिश, T2 8 तत (for दिश·) D5 7 T1 2 प्रव्राजिता (T2 °तै), Cg as in text (for प्रव्राजित) D5 7 T1 सर्वै, D9-11 सैन्यैर् (for सर्वैर्) Ś V3 D0-4 8 12 13 दिश विप्रद्रु(D0 1 °द्र)त पूर्वां (Ś2 D0 2 8 °र्वै), Ñ B दिश(B4 °श·) प्रधावित पूर्वां(B1 2 4 प्राची, B3 सर्वां), V1 2 स दिशं विद्रुत पूर्वां(V2 °र्वै) —^{d}) D3 प्लवगै· D7 लक्ष्मणश्च प्लवगमै —After 23, Ñ2 ins

465* विभीषणश्च निहतो राक्षसेन्द्रो महाबल ।

24 ^{a}) Ś1 यातो, Ś2 D12 शातो, D9-11 M3 सीते; L (ed) शातो (for शेते) D8 सुग्रीवो ग्रीवशातोपि. —^{b}) D3 प्लवगाधिप (unmetric), M5 प्लवगर्षभ . —^{c}) Ś Ñ V B3 D0-4 8 12 13 निरस्त(D2 °स्तं, D3 °स्य) हनुराकाशे, B1 4 निरस्तो भग्नदृष्ट्श्च, B2 D9-11 M5 निरस्त-हनुक सी(B2 °राशे)ते. —^{d}) Ś D8 12 राक्षसै सह, Ñ B2 3 परिघैर्हत , B1 4 विहनु कृत (for राक्षसैर्हत·). —After 24, D1 ins 466*

25 ^{a}) Ś1 इद्रजेत्रा स्वजानुभ्या, Ś2 Ñ V B D0-2 4 8 12 13 इद्रजानुसु(Ś2 °स्व, V2 B2 4 D2 13 °स्तु, B1 3 D0 1 4 °श्च)जानुभ्या —^{b}) Ś D8 12 जानुभ्या, B3 उरपाताद् (for उत्पतन्) V1 3 D0 2 पतितो, B3 विहतो, D1 4 पातितो (for निहतो) Ś Ñ V B1 3 4 D0-2 4 8 12 13 भुवि, B2 रणे

30 मैन्दश्च द्विविदश्चोभौ निहतौ वानरर्षभौ ।
28 निःश्वसन्तौ रुदन्तौ च रुधिरेण समुक्षितौ ॥ २६
24 असिनाभ्याहतश्छिन्नो मध्ये रिपुनिषूदनः ।
अभिष्टनति मेदिन्यां पनसः पनसो यथा ॥ २७
नाराचैर्बहुभिश्छिन्नः शेते दर्या दरीमुखः ।
कुमुदस्तु महातेजा निष्कूजन्सायकैर्हतः ॥ २८
अङ्गदो बहुभिश्छिन्नः शरैरासाद्य राक्षसैः ।
पातितो रुधिरोद्गारी क्षितौ निपतितोऽङ्गदः ॥ २९
हरयो मथिता नागैः रथजालैस्तथापरे ।
शायिता मृदितास्तत्र वायुवेगैरिवाम्बुदाः ॥ ३०
प्रद्रुताश्च परे त्रस्ता हन्यमाना जघन्यतः ।
अभिद्रुताम्तु रक्षोभिः सिंहैरिव महाद्विपाः ॥ ३१

(for युधि) G M5 निपपात हतो भुवि —For 25ab, D3 subst, D1 ins after 24

466* अनुशेते च मेदिन्या जाम्बवानृक्षसत्तम ।

—c) Ś V B1 2 D0-4 6-13 Cg पट्टिशैर्, Ñ B3 4 राक्षसैर् (for पट्टिसैर्) D2 बहुधा (for बहुभिश्) B4 छन्न, D7 T3 G2 3 M5 छिन्नो M1 2 ऋषभ पट्टसैश्छिन्न —V3 om. (hapl) 25d – 27a. —d) Ś Ñ V1 2 B D0-2 8 12 13 M1 2 प(D1 पा)तित ; D3 निकृत (for निकृत्त). D4 पातित पनसो यथा, D7 T3 G2 3 M5 निकृत्तो पादपो यथा.

26 V3 om 26 (cf v l 25) G1 om (hapl) 26-27 —a) Ś D8 द्विविधश्, D1 [अ]र्यविदश्च Ñ2 B1 2 4 G3 M5 चैव (for चोभौ). —b) Ś D8 12 वानरौ निहतौ रणे, Ñ2 D6 9-11 तौ वानरवर(D6 om [hapl] °वर)र्षभौ, V1 2 D0-4 13 निहतौ वानरौ रणे. —c) Ś1 D8 प्रशान्तौ, Ś2 V1 D12 13 प्रश्वसन्तौ, Ñ1 निष्टनन्तौ, Ñ2 T G2 3 M निश्वसन्तौ, D0 1 3 4 प्रस्वनन्तौ, D2 नि स्वनन्तौ, G (ed) निपतन्तौ (for नि श्वसन्तौ) Ś Ñ1 V1 B1-3 D0 3 4 8 12 नद(D4 °दं)न्तौ च, D1 च पतितौ, D7 पृथिव्यां तौ, D13 च गोत्रायां (for रुदन्तौ च) —d) D6 7 T2 3 M3 परिप्लुतौ, D9-11 परिवृतौ (for समुक्षितौ) Ś Ñ V1 2 B1-3 D0-4 8 12 13 रुधिरौघपरिप्लुतौ-(D2 °प्रवर्षिणौ) —After 26, Ś Ñ V2 B1 2 D2 8 12 ins, while B4 subst for 26cd

467* युधि विक्रम्य पुत्रेण मम शक्रजिता किल ।

[B4 D8 शत्रु-, D12 चक्र- (for शक्र)]

27 V3 om 27a (cf v l 25) G1 om 27 (cf. v l 26) Ñ2 illeg for 27a —a) Ś V1 2 D8 12 13 व्याहतश्, B2 प्राहतश्, D5 T1 M1.2 वानरश् (for [अ]भ्याहतश्) B1-3 M1 2 छिन्नो, B4 D0 छन्न D6 7 9-11 T2 3 G2 3 M3 5 असिना व्यायतो छिन्नो —b) D5 7 10 11 T1 M3 मध्ये रिपु-, D9 मध्यामरि-(for मध्ये रिपु-) D6 7 9-11 T2 3 G2 3 M1 3 5 -निषूदनो Ś Ñ V B D0-4 8 12 13 प्र(Ñ B1 3 वि)क्षीर्ण सु(Ñ2 B4 D0 8 12 °र्णसु)महाबल . —c) Ś D8 12 विचेष्टते च, Ñ V2 B1 3 सद्य पपात, V1 3 D3 9-11 अभि-(D9-11 °नु)ष्वनति, B2 अनुशेते स्म, B4 स्वनिस्वनति, D0 अतिष्टनति-(sic), D1 अतिस्वनति, D2 6 7 T2 M3 Cg अनु-(D2 6 °भि, T2 °धि)तिष्ठति, T3 अनुरुपतति, G2 3 M5 स निष्टनति (for अभिष्टनति). D4 अभीष्ट पतितो भूमौ —d) D4 मेदिन्या (for पनस) B1 2 4 राक्षसवृत (B4 °हत), G (ed.) [s]य द्रुमो यथा (for पनसो यथा).

28 a) Ś2 D2 8 12 13 भिन्न·, V3 सिद्ध·, D0 छन्न· (for छिन्न) —D0 om (hapl) 28b–29a Ñ2 illeg for 28b. —b) B1 (with hiatus) उर्व्यां, B3 दैव्यां (for दर्यां) Ś D8 12 13 शेते दधिमुख पुरा, V2 B4 D3 शेते दर्याद्यधी(D3 °री)मुख . —D6 reads 28c-d in marg —c) T3 सु-; Ct as in text (for तु) Ś D4 8 12 13 कुमुद· कुमुदाकारो —Ñ2 illeg for 28d – 29a —d) Ś V1 D4 8 9 12 निकृत्त, V3 निकृत, D2 बकवत्, D5 7 T1 2 M3 Cm g निष्कूज., D10 नि कूजन्, D13 नि कूज·, M1 2 निकृजन् (for निष्कूजन्) Ś V1 D2 4-9 12 13 T1 2 M3 कृत (for हत). Ñ1 V2 B G (ed) निष्पिष्ट पुष्प(G[ed] पद्म)मालिनः; D1 निमग्न सायकैः क्षितिं, D3 विमग्न पतित क्षितौ ❀ Ct. निष्कूजन्सायकैर्हत इति पाठः. ❀

29 D0 om, Ñ2 illeg for 29a (for both cf v l. 28) —a) D5 बाहुभिश् Ś2 D1-4 8 12 13 भिन्न (for छिन्न). B2 अगेषु बहुधा छिन्न —b) Ś D8 12 शूलै शेषैश्च, V3 D0-2 शूलै(D1 शरै, D2 शतै)रासाद्य, D13 शूलाघैरथ (for शरैरासाद्य). V1 D3 सायकै (for राक्षसै) —c) Ś V1 B2 4 D0-3 5-9 12 13 T2 3 G2 M3 5 Cg पतितो, Ñ1 V2 पातितो, Ñ2 B1 3 पीडितो, V3 D10 11 परितो, G (ed) शातितो (for पातितो) —d) Ś1 D8 12 13 मृतो, Ñ B3 G1 3 भूमौ (for क्षितौ) V2 ? नि प(V3 निष्प)तितोगद. M1 2 क्षितौ विनिहतो युधि

26 ☞ Cv is missing from 6 26 26 up to 6 27 19^{b} V3 om 26^{ab} —^{a}) Ś Ñ2 V1 2 B1 2 4 D0–4 8 12 13 गृहेषु (for गृहाणा) M1 2 प्रति, Cr m g k t as in text (for बलि) —^{b}) Ś Ñ V1 2 B3 4 D0–4 8 12 13 प्रेता (for श्वान) Ś D8 12 13 एवोपभुजते, Ñ1 V2 B1–3 D1 6 T2 3 प्रत्युप°, D7 9–11 °सेवते (for पर्युपभुञ्जते) ❀ Ck श्वान एवोपभुञ्जते न तु वायस्या ।, so also Ct which adds इत्यर्थ इत्यन्ये ❀ —^{c}) D7 9 गाव (for गोषु) Ñ B प्रसूयते (for प्रजायन्ते) Ś D2 8 12 13 मेषे(Ś °षी)षु जायते (for गोषु प्रजायन्ते) —^{d}) Ś Ñ1 V1 3 D3 4 6–12 मूषका (for मूषिका) Ś1 B4 D3 13 नकुलीषु च, Ś2 Ñ V B1–3 D0–2 4 8 10–12 नकुलेषु च (for नकुलै सह)

27 G2 om (hapl) 27, D4 om (hapl) 27^{ab} —^{a}) D5 सार्धं (sic) (for साधं) —^{b}) B4 D0–3 6 7 11 13 शूकराश्, D12 सूरकाश् (meta) (for सूस्रा) Ś Ñ V1 2 B D0–3 8 12 च श्वभि, V3 करिभिस्, D13 चाविभि (for शुनकै) —D5 om (hapl) 27^{cd} —^{cd}) Ñ1 V2 B3 किंनर्यो (for किनरा) Ś B1 D0 2 4 8 12 राक्षसाश्, T1 वानरैश् (for राक्षसैश्) Ś Ñ V1 2

[illegible] राक्षसाश्च विनायकाः ।
[illegible] कालरात्रीं विनायाय कपोला विचरन्ति च ॥ २८

[illegible] पिशाच्यः शाकिनी वेगमतु स्थिताः ।
[illegible] पिबन्ति रुधिरान्यन्ये निर्लिहाः कालेषिणः ॥ २९

कराला विकटो मुण्डः पुरुषः कृष्णपिङ्गलः ।
कालो गृह्णाणि सर्वेषां काले कालेऽन्ववेक्षते ।
एतान्यन्यानि दुष्टानि निमित्तान्युत्पतन्ति च ॥ ३०

[G1 2 ऊनि, Cg t as above (for रुन्ति) D2 M1-3 Cg च, D3 4 (for ते).]

30 a) V B1 2 D5-7 10 11 G Cgp विकलो, Cg as in text (for °टो) —After 30ab, B2 4 ins , while N2 B3 (m) cont l. 5-6 after 562*

559* यद्वाऽन्नपाणिर्वीभत्स काल नमयतीव न ।
प्रतिमाश्च प्रकम्पन्ते प्रविन्दन्ति हसन्ति च।
दृष्टाश्च महाराज अमुक्ता प्रहरन्ति च।
प्रयुक्ताश्च प्रवर्तन्ते रथ्यासु तमभिकाङ्क्षिण ।
गजेन्द्रो वाजिनश्चैव न च ग्रासमिनन्दिन । [5]
असृङ्मूत्र च मुञ्चन्ति ध्यायन्ति च समन्तत ।

[(l 1) B2 नित्यतु (for °स्त).—B2 om l 2. —For l. 2, cf l 1 of 548* —(l 3) Note hiatus between the two halves B2 अयुक्ता (for अमुक्ता) B2 प्रवर्तन्ति (for प्रवर्तन्ते) —B2 om l 4-5 —(l 5) N2 B3 वाजिन (for -नश्चैव) —(l 6) N2 शङ्खन्मूत्र च, B2 असन्मूत्र (for असृन्मूत्र च) N2 B3 [ध]न (for second न)]

—c) Ś V D6-8 12 रक्षो- (for काली) G M3 गृह्णाणि च, Cm g l t as in te t (for काले गृह्णाणि) Ś N V2 3 D6-8 12 13 सर्वाणि, V1 om (for सर्वेषा) —d) D2 नित्य -त्यो (for काले काले) N1 V1 2 [ऽ]नुवीक्षते, N2 च वीक्षते, V3 समीक्षते, D6 8 9 13 [ऽ]न्ववेक्षते(D2 °क्षि), D3 G M3 सम्वेक्षते(G1 M3 °न) , D4 °वेक्षता D11 °वेक्षत, Cg h t as in text (for ऽन्वपेक्षते) P4 चात्रान्तरान्तर स्थित अ Ck विष्णुमित्यादि श्लोकद्वय प्रक्षिप्तमिति। अत्यन्तप्रक्षिप्तम। प्राचीना प्रक्षिप्तमिति न व्याहु वन्ति। Ct तत्रादौ 'राम मन्यामहे विष्णु मानुष रूपमा स्थित। नहि मानुषमात्रोऽसौ राघवो दृढविक्रम । येन बद्ध सेतु स लोक स परमाद्भुत । कुरुष्व नरशार्दूल सर्वे रामेण साधव।" इत्यादि श्लोकद्वय प्रक्षिप्तमिति प्राचीनैर्न व्याख्यात मिति दृश्यते —After 30cd, K (ed) ins (within br ckts)

560* यद्द यत्नप्रयत्नाभि युद्धयता तु दिने दिने।
—Thereafter K (ed) cont 562*

e) G1 दृष्टानि (for दुष्टानि) —l or 30cd, Ś V1 2 B1 D2 4 5 6 t , while S V3 D1 3 4 7 8 12 13 sub l 561*

561* चात्र पद्मनिकर, वैनतेयायते जगत।
सौपर्णेभ्य ते यायुक्तपराभवलक्षणम ।
क्षणमुद्वि विद्य पश्यन्ति युद्धमानन्दिना द्विजा ।

विष्णुं मन्यामहे रामं मानुषं देहमास्थितम् ।
न हि मानुषमात्रोऽसौ राघवो दृढविक्रमः ॥ ३१
येन बद्धः समुद्रस्य स सेतुः परमाद्भुतः ।
कुरुष्व नरराजेन संधिं रामेण रावण ॥ ३२

इदं वचस्तत्र निगद्य माल्यवा-
न्परीक्ष्य रक्षोधिपतेर्मनः पुनः ।
अनुत्तमेषूत्तमपौरुषो बली
बभूव तूष्णीं समवेक्ष्य रावणम् ॥ ३३

G. 6 11.
B. 6
L 6 11

इति श्रीरामायणे युद्धकाण्डे षड्विंशतितमः सर्गः ॥ २६ ॥

[(1 1) Ñ D2 तीक्ष्ण N2 B2 3 कटुर् (for पटुर्) Ñ1 (m also) शीघ्रगामी, B1 तीक्ष्णरश्मिर् (for तीक्ष्ण पटुर्) B1-3 तापयति —D2 om 1 2 —(1 2) G (ed) त्वद्- (for तत्) —(1 3) Ś D8 12 13 हि प्रवाशति, V D0 2-4 हि(D3 च) प्रपश्यति, D1 हि प्रशमति, G (ed) इह पश्यति (for त्विह पश्यन्ति) B3 स्वितु (sic) पश्यति ते नित्य (for the prior half) V1 illeg for आनदिनो द्विजा Ñ1 V2 B1-3 उन्मादिनो, D3 4 आनदिता (for आनन्दिनो) V2 illeg for द्विजा Ś D8 12 द्विजा युद्धाभिनदिन , D13 युध्यमान द्विजैर्द्विजा (for the post half)]

—Thereafter they cont , while K (ed) cont (within brackets) after 560*

562* क्रव्यादा भक्षयिष्यन्ति मासानि गजवाजिनाम् ।

—Then Ñ2 B3 (m) cont 1 5-6 of 559*, while K (ed) further cont (within brackets)

563* सर्वं नष्टप्रभ मन्ये सैन्य त्वद्गेहमाश्रितम् ।

[Cf. 550*]

31 D5 6 T om 31-32 D11 om 31 Ś V B4 D0-4 8 9(after 10) 12 13 read 31-32 after 550*, while Ñ B1-3 read 31-32 after 551* —a) G2 3 M देव (for राम) Ś Ñ V B D0-4 8 9 12 13 विष्णु राममह मन्ये, D10 राम मन्यामहे विष्णु —b) D7 10 G3 M3 5 रूपम् (for देहम्) Ś V2 D0 4 8 12 आश्रित, D1 °त (for आस्थितम्) Ñ2 B2 D9 मानुषच्छ(Ñ2 B2 °ष छ)द्मरूपिण, B1 3 मानुष वें स्व(B3 चाद्य)रूपिण

—c) Ś D4 8 12 13 च, V D0-3 स (for हि) Ś V1 D0-4 8 12 13 वै (for ऽसौ) —V2 illeg for 31d

32 D5 6 T om 32 (cf v l 31) Ś V B4 D0-4 8 9(after 10) 12 13 read 31-32 after 550*, while Ñ B1-3 read 31-32 after 551* —a) Ś Ñ V2 3 B1-3 D2 4 8 9 12 13 M1 2 समुद्रेस्मिन्, V1 D0 7 10 11 समुद्रे च(V1 तु, D0 वै) (for समुद्रस्य) —b) D1 सेतुर्वै, D10 11 सेतु स (by transp) V1 3 D1-4 M1 2 सु(D2 च)महाद्भुत (for परमा°) Ś V2 D8 12 13 सेतु सुमहद्भुत —After 32, Ś Ñ V B D0-4 8 9(1 2 only) 12 13 ins

564* कुरुष्व वचन मह्य हितमुक्त निशाचर ।
सीताकृते महाप्राज्ञ महद्भयमुपस्थितम् ।
तथेमानि निमित्तानि लक्ष्यन्ते राक्षसाधिप ।

[V3 om 1 1-2 Ñ B3 om 1 1 D3 reads 1 1 twice —(1 1) L (ed) मेघ (for मह्य) V1 2 B2 4 D0 1 2(first time) 4 यद्य(V1 2 अस्य, B2 4 यस्या, D1 2 [second time] यच्च, D4 यदा)प्रतिनिविष्टोमि, B1 यद्यपि त्व निविष्टोसि (for the prior half) V2 D0 1 3(second time) 4 उक्तो (for उक्त) B1 हितयुक्त, B2 यस्या युक्तो, B4 तस्यामुक्तो (for हितमुक्त) V1 हितमुक्तोसि रावण, D3 (first time) यदि वा वेत्सि मा हि तत् (for the post half) —B2 reads 1 2 before 1 1, repeating it in its proper place —(1 2) B1 2(second time) 4 तस्या कृते(B4 क्षणे) (for सीताकृते) B4 D1 महाराज (for °प्राज्ञ) —(1 3) Ñ B1-3 यथेमानि, B4 तानि तानि (for तथेमानि) Ñ V2 3 B D0-3 लक्षये (for लक्ष्यन्ते) Ñ V B1-3 D0-4 राक्षसेश्वर],
while D5-7 9-11 S ins after 32

565* ज्ञात्वा प्रधार्य कर्माणि क्रियतामायतिक्षमम् ।

[D7 10 11 G1 Ct [अ]वधार्य, Cm g k as above (for प्रधार्य) D6 9 T2 3 Cm कार्याणि, Cg k t कर्माणि (as above). G2 M5 अद्य यत्क्षम]

33 a) Ś V1 D7 8.10-13 Ct तस्य, Cm.g as in text (for तत्र) Ś Ñ1 V2 3 B1 3 4 D0-4 8 12 13 निवेद्य, D11 निशम्य, G2 निगम्य (for निगद्य) ❀ Cm निगद्येति पाठेऽपि श्रावयित्वा रावण समवेक्ष्य रक्षोधिपतेर्मनः परीक्ष्य अनिवर्तन ज्ञात्वा तूष्णीं बभूव, किमपि नोवाचेत्यर्थः ।, Cg निशम्य श्रावयित्वा। अन्तर्भावितण्यर्थोऽयम्। रावणं रावणाकारम् ❀ —b) Ś2 B1 D3 8 12 13 निरीक्ष्य, G समीक्ष्य, G (ed) सुधीश्च (for परीक्ष्य) B2 रक्षोनृपतेर् (for रक्षोधिपतेर्) Ś V B1 4 D0-3 8 12 13 स्थितोग्रत , Ñ B2 3 हिते स्थित , D1 पुर स्थित , D6 T3 पुन पुन , D9 मनस्तदा, M5 महात्मन (for मन पुन) —V1 illeg for 33c,d —c) Ś D8 12 अनुत्तम हि, B4 अथोक्तमेव, M1 2 अनुत्तमश्च, L(ed) अनुत्तमम् (for अनुत्तमेषु) B2-4 -पूरुषो (for -पौरुषो) —d) D2 स बभूव (sic), D13 समरे स (for समवेक्ष्य) —After 33, Ś1 Ñ V2 3 B D0-4 8 12 13 G1 2 M5 ins

566* स तद्वचो माल्यवता सुभाषित
दशाननो न प्रशशस मौर्ख्यत ।
भृशं जगर्हे च सुदुष्टमानसो
मुमूर्षुरन्यच्च वचोऽभ्युदैरयत् ।

२७

तच्तु माल्यवतो वाक्यं हितमुक्तं दशाननः ।
न मर्षयति दुष्टात्मा कालस्य वशमागतः ॥ १

स बद्धा भ्रुकुटिं वक्त्रे क्रोधस्य वशमागतः ।
अमर्षान्परिवृत्ताक्षो माल्यवन्तमथाब्रवीत् ॥ २

हितबुद्ध्या यदहितं वचः परुषमुच्यते ।
परपक्षं प्रविश्यैव नैतच्छ्रोत्रगतं मम ॥ ३

मानुषं कृपणं राममेकं शाखामृगाश्रयम् ।
समर्थं मन्यसे केन त्यक्तं पित्रा वनालयम् ॥ ४

रक्षसामीश्वरं मां च देवतानां भयंकरम् ।
हीनं मां मन्यसे केन अहीनं सर्वविक्रमैः ॥ ५

वीरद्वेषेण वा शङ्के पक्षपातेन वा रिपोः ।
त्वयाहं परुषाण्युक्तः परप्रोत्साहनेन वा ॥ ६

(1. 1) V 2 3 B 4 D 0 1 2 [अ]भिभाषित, G 1 2 M 5 प्र° (for °)—(1 2) Ś 1 D 12 13 मूर्खवत्, D 4 मूर्खान्, D 8 मूर्खस्य (for माल्यवत्) G 1 2 M 5 प्रतिशुश्रुवे तदा (for प्रशशंस सः तदा)—(1 3) Ś 1 Ñ 2 B 3 D 8 12 [ष]व (for च) D 0 4 दुष्ट (for दुष्ट)—(1 4) G 1.2 M 5 अत्युच्च (for उच्चस्थ) Ś 1 D 0 12 [Ś]न्यमीव; V 2 3 B 4 D 3 [Ś]न्युद्यी-र्ण B 2 D 0 2 13 G 2 M 5 [Ś]-पूरियन् D 4 मुमूर्षुचेताश्च तदा पुरस्थः]

Colophon —*Kāṇḍa* 1 *am.*: Ñ 1 V 3 B 1.3 4 D 2 12 13 माल्यवदाख्याने, D 0 सुन्दरकाण्डे, D 4 सुन्दरकाण्डे लङ्कापर्वणि. —*Sarga* 1 *am.*: Ś Ñ V 2 3 B D 0–4 8 9 12 13 माल्यवद्वाक्य. —*Sarga no* (figures, words or both) Ś 1 Ñ 1 B 2 D 0 2 4 12 13 om Ś 2 Ñ 2 V 1 2 B 1.3 4 D 3 9 11, V 3 D 8 10, D 1 13; D 0–7 10 11 T 1 3 G M 35, T 2 34 —After colophon, D 8 concludes with राम; while G M 1 2 5 conclude with श्रीरामाय नम .

27

Ed. Cr 1s mis-num. 1–19^b (cf v l 26 26)

1 ^{a}) Ś D 0 2 4 12 ततो (for तच्तु). B 4 तथा माल्यवतो-क्तम्, D 2 4 12 ततो(D 2 तत) माल्यवता वाक्य —^{b}) B 1 2 D 4 हितयुक्त, D 3 हितमुक्तो, D 4 हितयुक्त B 4 निशाचर (for दशानन). —^{c}) Ś Ñ 1 V 1 2 B D 0 2–4 8 12 13 नामर्षयत, Ñ 2 न मर्षये स, V 3 अमर्षयन्, D 1 नामर्षयद् (subm.) (for न मर्षयति) Ñ B 1–3 दुर्मति. Cr न मर्षयति न मर्षयति मां; C न मर्षयति नामर्षयन्

2 ^{a}) B 1 2 4 क्रुध्या, D 4 तदा (sic) (for बद्धा). Ś V 1 2 D 4 T 1 3 भ्रुकुटि (sic), B 4 D 2 3 11 G 1 भ्रुकुटीं, D 0 4 8 G 2 M 5 भ्रुकुटीं (for भ्रुकुटि) 12 सर्वं (for वक्त्रे)—^{b}) Ś V 1–3 D 0–4 प्रतिबद्ध(V 2 V प्रतिबुद्ध, D 2 प्रतिबोध्य (for परिवृत्त) Ś प्रधक्ष्यन्निव मां, B 4 क्रोधाग्निसमर्पित, D 12 तदस्य च D 4 क्रोधस्य मूर्तिमान्, G 1 M 5 क्रोधेन रक्तपूर्णा-क्षो —^{c}) B 4 प्रत्यवदत् (for अब्रवीत्) Ś D 8 12 13 पापि-ष्ठमेवं मां, D 4 पापमयमसंशयम्, D 0 13 तदस्य च D 2 क्रोधस्य मूर्तिमान्, G 1 M 5 क्रोधेन रक्तपूर्णा-क्षो —^{d}) D 4 मामयं माल्यवान्-वीत्

3 ^{a}) Ś D 8 12 13 यदप्येतत्, Ñ B 1–3 यदार्येण, V D 0–4 तु(D 0 च) यदिदं, B 4 यदसि मे, G 1 यदभिहित (hypm.), Cg k t as in text (for यदहित)—^{b}) Ñ B 1–3 मोहात्, V D 4 त्वया; B 4 D 0 2 तत्तत्, D 3 यद्यत् (for वचः) B 4 M 1 2 उक्तवान्, Ct as in text (for उच्यते). Ś D 8.12 तत्पौरुषमिहोच्यते, D 13 पारुष्य तद्विहोच्यते.—^{c}) Ś Ñ V B 1.2 D 8 12 13 प्रशस्यैव(B 2 °नं), B 3 D 0–3 प्रशस्यैव, B 4 व्यपाश्रित्य (for प्रविश्यैव) D 4 परपक्षप्रशंसा च. —^{d}) Ś D 8 12 तच्; B 4 [ए]व (for [ए]तच्) Ś V D 0–4 8 12 13 G 1 2 श्रोत्र(D 4 8 °तु)सुख, B 3 (*sup lin* also) श्रुतिगत, M 5 Cg श्रोत्र गत, M 5 चात्र सुख, Ck t as in text (for श्रोत्रगत)

4 ^{b}) D 1 एन, D 3 एक- (for एकं)—^{c}) B 1 सामर्थ्यं (for समर्थं)—D 9 om (hapl.) 4^d–5^c.—^{d}) G 1.3 पित्रा त्यक्त (by transp.) Ñ V B D 1 3 10 11 M 5 वनाश्रयं, D 13 च सालस (sic), Cg as in text (for वनालयम्).

5 D 9 om 5^{abc} (cf v l 4).—^{b}) B 2 3 D 7.10 11 T 1 2 देवाना च(B 3 om [subm.]), G 1 M 1 2 देवतानां (for देवतानां) V 3 G M 5 भयावहं.—G 2 repeats 5^{cd} after 8 Note hiatus between ^{c} and ^{d}—^{c}) Ś V 1 D 0–4 12.13 अहीन, Ñ 2 हीनं त्व; V 2 3 त्वं हीन, D 11 हीन वा, M 1.2 Ck विहीन, Cg t as in text (for हीन मां) Ñ B 1–3 कस्माद्, D 4 हीन (for केन)—D 6 reads 5^d in marg —^{d}) Ś V 1 D 1 2 8 13 हीन मां; V 2 3 D 5 T 1 M 3.5 त्वहीनं (to avoid hiatus), D 0 12 हीन मां, Cm as in text (for अहीन) Ś D 8 12 जतु-; V 1 B 1–3 D 0 1 सत्व-; V 3 चेत्र, D 13 त्व तु (for सर्व-). Ñ 2 सत्यविक्रम D 3 हीन सत्यसविक्रमं (sic), D 4 मम सत्येन विक्रम .

6 ^{a}) V 3 राग, T 3 चिर-, Cg k t as in text (for वीर-) D 4 द्वेषे द्वेषेपि Ś D 8 12 सधे-, D 13 [आ]चक्षे (for शङ्के)—^{b}) V 1 या प्रभो, D 3 चापि वे, D 4 वैरिणा; D 7 T 2 3 च रिपो, Cg as in text (for वा रिपोः.) —^{c}) V 3 D 0 10 11 Ct मम (for पर-) Ś Ñ V 1.2 B D 0–4 8 12 13 -प्रोत्साहितेन D 1 2 च (for वा) D 6 परस्यो-त्साहनेन वा.

Ayu Research Team

प्रभवन्तं पदस्थं हि परुषं कोऽभिधास्यति ।
पण्डितः शास्त्रतत्त्वज्ञो विना प्रोत्साहनाद्रिपोः ॥ ७

आनीय च वनात्सीतां पद्महीनामिव श्रियम् ।
किमर्थं प्रतिदास्यामि राघवस्य भयाद्दृढम् ॥ ८

वृतं वानरकोटीभिः ससुग्रीवं सलक्ष्मणम् ।
पश्य कैश्चिदहोभिस्त्वं राघवं निहतं मया ॥ ९

द्वंद्वे यस्य न तिष्ठन्ति दैवतान्यपि संयुगे ।
स कस्माद्रावणो युद्धे भयमाहारयिष्यति ॥ १०

द्विधा भज्येयमप्येवं न नमेयं तु कस्यचित् ।
एष मे सहजो दोषः स्वभावो दुरतिक्रमः ॥ ११

यदि तावत्समुद्रे तु सेतुर्बद्धो यदृच्छया ।
रामेण विस्मयः कोऽत्र येन ते भयमागतम् ॥ १२

स तु तीर्त्वार्णवं रामः सह वानरसेनया ।
प्रतिजानामि ते सत्यं न जीवन्प्रतियास्यति ॥ १३

एवं ब्रुवाणं संरब्धं रुष्टं विज्ञाय रावणम् ।
व्रीडितो माल्यवान्वाक्यं नोत्तरं प्रत्यपद्यत ॥ १४

G. 6 12
B. 6 3
L. 6 12

7 [a]) M5 प्रभावत Ñ B1 3 च, B2 मा, T2 वा (for हि) B4 हि मा कोन्य , M1 2 समर्थं हि, Cg t as in text (for पदस्थ हि) —[b]) Ñ1 G M1–3 कोभिधास्यते, Ñ2 D6 M5 को विधास्यति(D6 M5 °ते), B4 वक्तुमर्हति, D7 °भाषितु, D8 हि *स्यति (lacuna), D9–11 Ct °भाषते, Ck as in text (for कोऽभिधास्यति) Ś1 को भ्रामयति पूरुष, Ś2 D12 पुरुष को हि भ्राम्यति —[c]) B4 सर्वशास्त्रज्ञस्, G3 शास्त्रवित्प्राज्ञो (for शास्त्रतत्त्वज्ञो) —[d]) M3 सोत्साहनाद् V1 D0 2 गुरु, D1 परं (for रिपोः) V3 परस्योत्साहनादृते, B4 त्व तु प्रोत्साहितो ध्रुव, D7(marg , orig as in text) 9–11 Ct विना प्रोत्साहनेन वा ❀ Ct वाशब्दो निश्चये ❀

8 [a]) Ś Ñ V B D0–4 8 12 13 आदाय V3 D1 वचनात् (meta), D13 च बलात्, G1 2 M5 हि वनात्, Cm as in text (for च वनात्) —[c]) D2 प्रतियास्यामि (sic) —[d]) V3 D0–4 8 12 13 राघवाय. Ñ B3 इति, V1 3 B1 2 D2–4 इव, V2 D0 1 इह, B4 अपि (for अहम्) ❀ Cg राघवस्य राघवात् ❀ —After 8, G2 repeats 5[c-d]

9 [a]) D0 4 -कोटिभि —[b]) Ś B2 D3 8 12 सुग्रीव सह-, B4 सुग्रीव च स (for ससुग्रीव स-) —[c]) Ñ2 D1 4 7 9–11 अहोभिश्च, B4 D3 अहोरात्रे —[d]) Ś Ñ V B1–3 D1–3 8 12 13 transp राघव and निहत

10 [a]) Ñ1(m gloss) B2 युद्धे (for द्वंद्वे) D0 द्वंद्वयुद्धे न प्रतिमा —V2 illeg for 10[b] —[b]) Ś D0–4 8 12 13 देवता अपि (D1 अपि च [hypm]) (for दैवतान्यपि) Ñ1 B1 3 देवगधर्वदानवा , Ñ2 V3 देवता न च पन्नगा , V1 देवा अपि च समुखे, B2 देवदानवपन्नगा —[c]) T3 न (for स) G2 राघवो (sic) (for रावणो) —For 10[c-d], Ś Ñ V B D0–4 8 12 13 subst

567* रावणो मानुप प्राप्य भयमाहारयेत्कथम् ।

[D13 * * रामेण मानुष्य (corrupt) (for the prior half) D3 भयाद् (sic) (for भयम्) V3 आहरते (for आहारयेत) V1 स भय कथमावहेत् (for the post half)]

11 [a]) V1 विभज्येयम् (hypm), V2 D4 G2 भवेयम्, Cr m g k t as in text (for भज्येयम्) D0 3 भज्येय वापि, D13 भज्ये त्वमपि (sic) B4 D3 7 G2 3 [ए]व, Cr m g k t as in text (for [ए]वं) Ś D8 12 द्विधा भज्येयमो वा मा —[b]) V3 om , B4 नमेय न (by transp) (for न नमेय) V2 G2 च, M1 2 हि, Cm as in text (for तु). Ś D8 12 कर्हिचित् —[c]) T3 ते, Cm g as in text (for मे) D8 12 द्वेष (for दोष) —[d]) B4 D0 3 13 स्वभावाद्, D2 स्वभाव- Ñ2 B2 गुणो वा प्रसमीक्ष्यता

12 B2 reads 12 twice (var) —[a-b]) Ś V B2(second time) 4 D0–4 8 12 13 G1 समुद्रस्य, Cg k t as in text (for समुद्रे तु) V3 G1 M5 बद्ध सेतुर् (by transp) B2(second time) यथेच्छया (for यदृच्छया) Ñ B1 2(first time) 3 यदि राम इह प्राप्तो वानरैर्दुर्बलैः सह —B1 3 read 12[c-d] twice (var) —[c]) Ñ B1–3(all the three first time) तेन ते(Ñ1 चेद्) (for रामेण) —[d]) Ś V1 B1–3(all the three second time) D0–2 4 8 12 13 यतस् (for येन) G (ed) उत्थित (for आगतम्)

13 [a]) B4 यदि तीर्णो, D7 T3 G1 ननु तीर्त्वा, Cm g as in text (for स तु तीर्त्वा) Ś D8 12 कामं राममिहोत्तीर्णं (sic), Ñ B1–3 यदि चे(Ñ2 वे)हागतो राम , V D0–4 12 काम(V2 अय) राम इहोत्तीर्ण (D4 * तस्तीर्ण) —[c]) V2 अभिजानामि Ś D9 12 सत्यं ते (by transp), B4 D13 सत्य च(D13 स), D0 ते सर्वं (for ते सत्य) V1 3 अभि(V1 प्रति)जानासि मे सत्य (sic) —[d]) V3 जीवन्न (by transp) D3 न मे जीवन्गमिष्यति

14 [a]) V1 2 वदंत, D0–2 4 ब्रुवत Ś1 D8 सीतार्थं, Ś2 D12 सेनास्थ, Ñ B1–3 सक्रुद्ध, V2 तत्सर्वं (for सरब्धं) —[b]) Ś V B4 D0 1 3 8 12 13 क्रुद्ध, Ñ B1–3 D2 स तु, D4 ततो (for रुष्ट) G M5 क्रुद्ध(G3 रुष्ट) दृष्ट्वा दशाननं —Ś1 om 14[c]–15 —[c]) V1 3 पृष्टतो (for व्रीडितो) Ś2 Ñ V2 B D8 12 13 तूष्णीं, V1 3 D0–4 तूष्णं (for वाक्य) —[d]) B4 D10 11 G1 M2 5 प्रतिपद्यत(M5 °ते), Ct as in text (for प्रत्यपद्यत) Ś2 V1 3 D0–4 8 12 13 तस्मादेशाद्-पाक्रमत्.

Arya Research Team

२८

नरवानरराजौ तौ स च वायुसुतः कपिः ।
जाम्बवानृक्षराजश्च राक्षसश्च विभीषणः ॥ १
अङ्गदो वालिपुत्रश्च सौमित्रिः शरभः कपिः ।
सुषेणः सहदायादो मैन्दो द्विविद एव च ॥ २
गजो गवाक्षः कुमुदो नलोऽथ पनसस्तथा ।
अमित्रविषयं प्राप्ताः समवेताः समर्थयन् ॥ ३
इयं सा लक्ष्यते लङ्का पुरी रावणपालिता ।
सासुरोरगगन्धर्वैरमरैरपि दुर्जया ॥ ४
कार्यसिद्धिं पुरस्कृत्य मन्त्रयध्वं विनिर्णये ।
नित्यं संनिहितो ह्यत्र रावणो राक्षसाधिपः ॥ ५

G 6 13
B 6 37
L 6 13

B4 लक्षण (for पुष्कलम्) D3 सुपुष्कल तदा (for पुरस्य पुष्कलम्) —^{c}) Ś V2 D2 3 8 12 13 मन्त्रिजनेन, Ñ1 V1 3 D0 1 4 [अ]मात्यजनेन (V3 °गणेन) (for मन्त्रिगणेन). —^{d}) Ś Ñ1 V B4 D0–4 8 12 13 जगाम (for विवेश) D4 5 T1 M1–3 च (for सो) Ś Ñ1 V3 D0–4 8 12 13 ऋ(D2 वृ)-द्धिमत्तदा, Ñ2 B2 ऊर्जितस्त(Ñ2 °तं त)दा, V1 2 ऋद्धिमत, B1 3 ऊर्जितस्तथा, B4 आशु बुद्धिमान्, G1 2 ऋद्धिमदृह (for ऋद्धिमन्महत्)

Colophon —*Kāṇḍa name* Ś1 V3 B2 D5 9 om , Ñ B1 3 4 D2 12.13 लका°, D0 4 सुदर° —*Sarga name* Ś Ñ1 D0–4 8 12 13 लंकावि(Ñ1 D2 °भि)धान, Ñ2 रावण-विचारणा, V1 पुरगुप्तिविधानं, V2 गुप्तिविधान , V3 लका-सविधान, B1 पुरविधान, B2 गुप्तिपुरविधान, B3 लकाया वीरप्रस्थापन, B4 सैन्यविधान , D9 रावणवाक्य —*Sarga no* (figures, words or both) Ś1 Ñ1 B2 D0 2 4 12 13 om , Ś2 Ñ2 V1 2 B1 3 4 D3 9 12 , V3 D8 11 , D1 14 , D5–7 10 11 T1 3 G M 36 , T2 35 —After colophon, Ś2 concludes with श्रीराम , D2 with राम, G M1 2 5 with श्रीरामाय नम .

28

1 ^{a}) Ś D2 7–13 G1 3 Ck -राजानौ, Ñ2 B4 -राजौ च, V2 3 B1–3 D0 1 3 -राजौ तु (for -राजौ तौ) ❀ Ct नरेति। रामसुग्रीवौ। टजभाव आर्षः ❀ —^{b}) Ñ1 V2 B1 D0 3 7 9–11 तु (for च) —G transp 1^{cd} and 2^{ab} —^{c}) D0 जाम्बवान् V1 तु (for च) —D9 om (hapl ?) $1^{d}-2^{a}$ —^{d}) D6 reads राक्षसश्च in marg Ś Ñ1 V B3 (marg also as in text) 4 D0–4 8 12 13 रावणावरजस्तथा (D3 °दा)

2 D9 om 2^{a} (cf v l 1) G transp 1^{cd} and 2^{ab} For subst see below —^{b}) B4 तथा (for कपि) —For 2^{ab}, V1 3 D0–4 subst 1 1 only of 570* —V1 3 D0–4 om $2^{c}-3^{b}$ —^{c}) B1 सुषेणो नलतारौ च

3 V1 3 D0–4 om 3^{ab} (cf v l 2) —^{a}) B4 गयो (for गजो) M5 गवयो (for कुमुदो) —^{b}) B4 नीलो (for नलो) G1 च (for ऽथ) D9 तदा (for तथा) —For $2-3^{b}$, Ś D8 12 13 subst , while V1 3 D0–4 subst 1 1 only for 2^{ab}

570* अङ्गदो द्विविदो मैन्दो लक्ष्मणो नील एव च।
अन्ये च वानरश्रेष्ठा शतशोऽथ सहस्रश ।

[(l 1) Ś D8 द्विविधो —After l 1, D2 reads 7^{cd} for the first time, repeating it in its proper place —(l 2) Ś1 मन्ये (*for* अन्ये)], while Ñ V2 B1–3 subst

571* अङ्गदो लक्ष्मणो मैन्दो द्विविदो हरियूथप ।
कुमुद शरभश्चैव ऋषभो गन्धमादन· ।
धीमान्दधिमुखश्चैव सुषेणस्तार एव च ।
गयो गवाक्षो गवयो नलो नीलश्च वानर· ।

[(l 1) V2 द्विविदो (for लक्ष्मणो) Ñ1 पनसो (for द्विविदो) V2 लक्ष्मणो नील एव च (for the post half) —(l 2) Ñ1 मुकुद (for कुमुद) —(l 3) Ñ1 V2 B1 श्रीमान् (for धीमान्) Ñ1 तत्र (with hiatus) (for तार) —(l 4) Ñ1 गजो (for गयो)]

—^{d}) Ñ V3 B त्व(B4 ह्य)मंत्रयन्, V1 समत्रयन्, V2 अमत्रयन् (for समर्थयन्) Ś D0–4 8 12 समभेवाभ्यमत्रयन्, D9 समरे पर्यवारयन्, D13 समरे चाभ्यवर्तयन् ❀ Cr समर्थयन् अमत्रयन्। अडभाव आर्षे ।, so also Cm g k t ❀

4 ^{a}) Ñ B1 2 एषा (for इय) D4 13 आ- (for सा) Ñ V1 2 B1 2 दृश्यते (for लक्ष्यते). B4 सेय नो दृश्यते लका —^{c}) Ś Ñ V B1–3 D0–4 8 12 13 मानुषा(D0 °वं)सुर-, B4 मानुषोरग-, G1 3 सासुरैरपि, M5 ससुरा-सुर- (for सासुरोरग-) —^{d}) Ñ B2 4 स(B2 4 अ)सुरैर्, D4 उरगैश् (for अमरैर्) V B3 4 D1–4 चापि (for अपि) B1 D7 9–11 Ct सर्वैरपि सुदुर्जया, G (ed) सुरैरपि सुदुर्जया

5 G (ed) transp ^{ab} and ^{cd} —^{a}) Ś Ñ1 V1 2 D1–4 8 12 13 पुर्यामेवविधाया तु (D3 च), V3 D0 पुर्या-(D0 दुर्ग)मेव विधानं हि (D0 च), B4 पूर्वमेव विधातव्य, G1 3 अस्यामेवविधाया तु —^{b}) D0 13 मन्त्रयश्च (for मन्त्रयध्व). Ñ V2 B3 विनिर्णय, B1 सुनिर्णयं, B2 विनिश्चयं, B4 विसर्जये, D0 विनिश्चये, D1 3 4 8 12 13 विनिर्जये, D2 विनिर्जया (for विनिर्णये) —^{c}) Ś Ñ V B D3 4 6–12 M5 यत्र (for ह्यत्र) —D12 om (hapl) $5^{d}-6^{a}$ —^{d}) Ś V3 D0–2 8 13 रावयन्प्रजा , Ñ द्रावयन्प्रजा , V1 2 धारयन्प्रजा , B [s]द्राव(B1[s]बाध)यत्प्रजा , D3 लोक-रावण , D4 G2 M5 रजयन्प्रजा (M5 °जा) (for राक्षसाधिप)

:6 तथा तेषु ब्रुवाणेषु रावणावरजोऽब्रवीत् ।
:6 वाक्यमग्राम्यपदवत्पुष्कलार्थं विभीषणः ॥ ६
:5 अनलः शरभश्चैव संपातिः प्रघसस्तथा ।
गत्वा लङ्कां ममामात्याः पुरीं पुनरिहागताः ॥ ७
भूत्वा शकुनयः सर्वे प्रविष्टाश्च रिपोर्बलम् ।
विधानं विहितं यच्च तद्दृष्ट्वा समुपस्थिताः ॥ ८
संविधानं यथाहुस्ते रावणस्य दुरात्मनः ।
राम तद्ब्रुवतः सर्वं यथातथ्येन मे शृणु ॥ ९
पूर्वं प्रहस्तः सबलो द्वारमाद्य निष्टति ।
दक्षिणं च महावीर्यौ महापार्श्वमहोदरौ ॥ १०
इन्द्रजित्पश्चिमद्वारं राक्षसैर्बहुभिर्वृतः ।
पट्टसासिधनुष्मद्भिः शूलमुद्गरपाणिभिः ॥ ११
नानाप्रहरणैः शूरैरावृतो रावणात्मजः ।
राक्षसानां सहस्रैस्तु बहुभिः शस्त्रपाणिभिः ॥ १२

---

6 D12 om 6ª (cf v l 5). —ª) D7 9–11 अथ (for तथा) —After 6ªᵇ, Ñ V2 B ins

572* राघवस्य हितं वाक्यमहित रावणस्य च ।
मन्त्रार्थकुशलो नित्यं धर्मात्मा बुद्धिपण्डित ।

[(l 1) G (ed) रामस्य च (for राघवस्य) —(l 2) Ñ1 मन्त्रानु- (for मन्त्रार्थ-) B2 -दर्शनो (for -कुशलो) B1 2 4 धर्मबुद्धि स(B2 सु-) पण्डित (for the post half)]

—ᶜ) T2 अव्यग्र-, Cm g k t as in text (for अग्राम्य-) Ś Ñ V B D0–4 8 12 13 वाक्यं हेत्वर्थ(Ñ1 तत्त्वानु, Ñ2 B2–4 तत्त्वार्थ)मयुक्त(D0 °सहित), G1 वाक्यं वाक्यविदा श्रेष्ठ .—ᵈ) V1 पुष्कलं तु (for पुष्कलार्थं)

7 ª) G2 अनिल (for अनल) Ś V B4 D0–2 4 8 12 13 च हरश्, Ñ B2 3 D3 च नलश्, B1 T1 चानिलश्, D5 चानलश्, D9–11 पनसश् (for शरभश्) —ᵇ) D1 सम्पति (for सपाति) Ś D2 8 12 13 प्रस्त(D2 °भ, D13 °श्र)वस्, V B2 प्रसभस्, B4 T2 G2 M5 प्रमृगस्, D1 प्रसवस्, D7 विहगस्, D9–11 G1 प्रम(G1 °भू)निम्; T2 प्रमुखस्, G2 अनिलस्, M1 2 पनसस्, M3 प्रसभस् (for प्रघसस्) B1 D4 6 सपातिप्रमुखास्तथा, D5 T1 हर संपातिरेव च —After 7ªᵇ, Ñ B ins

573* निमेषान्तरमात्रेण मायया मी अतन्द्रिता ।

[Note hiatus between मायया मी and अतन्द्रिता B1 सुनन्दिता (for अतन्द्रिता) Ñ2 मायया मिनविक्रमा ; B2 मायया वीक्ष्य तन्द्रिता, B4 माया वीक्ष्य तथानुगं (for the post half)]

—D2 repeats 7ᵒᵈ here (cf v l 570*) —ᵉ) G3 transp गत्वा and लङ्का. B4 सह-, T2 महा- (for मम) Ś Ñ B1–3 D0–2(first time) 3 8 12 13 गत्वा लङ्कामामात्या मे (Ñ1 B1 3 °ास्ते, B2 °स्या ये), D2(second time) गत्वा लङ्का महावेगा, G(ed) लंकां गत्वा ममाभ्यासे —ᵈ) V3 पुरीं रावणपालिता

8 ª) B4 कुशलिन (for शकुनय) V2 3 बुद्ध्वा शत्रूनय सर्वे —ᵇ) Ś V D0–4 8 12 13 प्रविष्टास्ता(V D0–4 °स्ते) महापुरीं(V2 पुरीमिमा), Ñ B1–3 प्रविष्टा(Ñ1 B2 3 प्रेषिता) वरिण पुरीं, B4 प्रविष्टा वे रिपो पुरीं —ᵉ) V2 विधेहि, Cm g k t as in text (for विधानं) D0 तत्र (for यच्च) —ᵈ) Ñ1 B2 ते, D11 न (sic) (for तद्) Ś Ñ2 V B1 2 D0–4 8 12 13 transp तद् and दृष्ट्वा Ś2 समुपास्थिता ; Ñ2 M1 2 समुपागता ; V सर्वमागता, B4 पुनरागता, D1 मामुपस्थिता, C1 as in text (for समुपस्थिता).

9 D4 om 9ªᵇ. —ª) Ś Ñ V1 2 B2–4 D0–3 7 8 12 13 T3 G1 M3 6 यदाहुस्, G(ed) तदाहुस्; Cg as in text (for यथाहुस्). —ᶜ) Ñ2 वदत (for ब्रुवत) Ś V D0–2 4 8 12 13 राजस्ते (Ś V2 3 D8 12 °स्ते) कथित, M5 कर्म ब्रवीमि तत, Cg as in text (for राम तद्ब्रुवत) Ñ B1–3 सत्य (for सर्वं) D3 ब्रुवतो मम नि शेषं —ᵈ) Ś D1 4 8 12 13 य(D12 या)थान्य तु(D1 3 च), Ñ2 V1 B1–3 D3 5 7 10 11 Γ1(marg also as in text) G1 3 याथातथ्येन, V2 3 B4 D0 याथातथ्य च, D2 यथातत्त्वं तु, D6 T2 3 M2 Cg यथातत्त्वेन (for यथातथ्येन) Ś V2 3 B1 D0–2 4 8 12 13 तच्, V1 च, D3 om (suom) (for मे)

10 ª) D6 पूर्वं Ś Ñ V B1–3 D0–4 8 12 13 बलवान् (for सबले) —ᵇ) Ś Ñ V B D0–4 8 12 13 M5 आवृ-(V1 D0 M5 °त्रि)त्य (for आद्य). D6 तिष्ठत ; T2 3 विष्टित (for निष्टति) —ᶜ) B4 दक्षिणे Ś Ñ V B D0–4 8 12 13 तु (for च). M3 -वीरौ (for -वीर्यौ)

11 ª) Ś Ñ V B1 3 4 D0–6 8–13 पश्चिमं (for पश्चिम-) —ᵇ) B4 सह (for वृत) D5(after corr as in text) परिवारित (for बहुभिर्वृत). —Ś D8 12 G2 om (hapl) 11ᶜ–13ᵇ —ᶜ) D6 7 9–11 पट्टिश- (for पट्टस-). B4 D2 13 पट्टिशासिधनुष्पाणि (B4 °धरैर्योधै; D13 °भुशुण्डीभि) —ᵈ) D2 सूत्र- (for शूल-) D9 -पट्टिश-, T3 -पट्टस- (for -मुद्गर-) D13 -पाणय (for -पाणिभि)

12 Ś D8 12 G1 2 om 12 (for all except G1, cf v l 11) —ᵇ) B4 D2 13 आस्थितो (for आवृतो) —For 11ᶜ–12ᵇ, Ñ V B1–3 D0 1(reads after 13) 3 4 subst

574* पट्टिशासिधनुष्पाणिरास्थितो रावणात्मज ।

[D1 परिवारि-. V1 रावणानुज, D1 रावणिस्तत]

—D1 om 12ᶜ–13ᵇ —ᵈ) V D0 2–6 13 सहस्रैर्वै(V3 D0 सशस्त्रैर्वै, D3 शस्त्रैश्च व, D12 स सर्वैर्वै)हुभिर्वृत (D2 13 °भि सह)

युक्तः परमसंविग्नो राक्षसैर्बहुभिर्वृतः ।
उत्तरं नगरद्वारं रावणः स्वयमास्थितः ॥ १३
विरूपाक्षस्तु महता शूलखड्गधनुष्मता ।
बलेन राक्षसैः सार्धं मध्यमं गुल्ममास्थितः ॥ १४
एतानेवंविधान्गुल्मॉल्लङ्कायां समुदीक्ष्य ते ।
मामकाः सचिवाः सर्वे शीघ्रं पुनरिहागताः ॥ १५
गजानां च सहस्रं च रथानामयुतं पुरे ।
हयानामयुते द्वे च साग्रकोटी च रक्षसाम् ॥ १६
विक्रान्ता बलवन्तश्च संयुगेष्वाततायिनः ।
इष्टा राक्षसराजस्य नित्यमेते निशाचराः ॥ १७
एकैकस्यात्र युद्धार्थे राक्षसस्य विशां पते ।
परिवारः सहस्राणां सहस्रमुपतिष्ठते ॥ १८
एतां प्रवृत्तिं लङ्कायां मन्त्रिप्रोक्तां विभीषणः ।
रामं कमलपत्राक्षमिदमुत्तरमब्रवीत् ॥ १९

G. 6 13
B. 6 37
L. 6 13

13 Ś Ñ V B D0-4 8 12 G2 om 13^{ab} (for Ś D8 12 G2, cf v l 11, for D1 12) —^{a}) D9 सविन्नै, G1 -सपन्नो, Ck t as in text (for -सविन्नो) ❀ Cg असविन्न अकम्पित-हृदय ❀ —^{b}) G3 पुन (for वृत) D9-11 M1 2 राक्षसै सह मन्त्रिवत् (M1 2 परिवारित), G1 राक्षस प्रमुखैर्वृत —^{d}) Ñ1 B3 आगत (for आस्थित) D4 तावुभौ शुकसारणौ —After 13, D1 reads 574*

14 M3 reads 14 *int lin* —^{a}) B4 तु बलवान्, D0 सुमहता —^{b}) Ś V B4 D1 3 4 8 12 13 शूलशक्ति-, Ñ B1-3 तू(B2 बा)णाशनि, D0 शक्तिशूल-, D2 शूलपट्टि- (for शूलखड्ग-) D1 G2 -धनुष्मता —^{c}) Ñ2 राक्षस, V1 2 B4 रक्षसा, V3 M1 रक्षमा, M2 महता, M5 बहुना (for राक्षसै) —^{d}) Ś Ñ1 D4 7 9-11 G3 आश्रित (for आस्थित)

15 V3 om 15 —^{a}) Ś Ñ V1 2 B D0-4 8 12 13 G2 3 ए(B2 कृ)ता(Ś2 °व)मेवंविधा गुप्ति(G2 वृत्ति), D6 तानेव विविधान्गुल्मान् —^{b}) V1 2 B3 D5 7 9-11 G2 3 लकाया Ñ B1 2 4 समवेक्ष्य च(B1 4 ते), V2 समुदारयत् (sic), D3 समुदैक्ष्य ते, D4 समुदैक्षतु (sic), M1 2 समुदीक्ष्य वै (for समुदीक्ष्य ते) —^{c}) D2 कामगा (for मामका) Ñ2 D9-11 मन्त्रिण· (for सचिवा.). —^{d}) Ñ1 B ज्ञात्वा (for शीघ्र) B4 शीघ्रम् (for पुनर्) D5 T1 M3 transp शीघ्र and पुनर् D1 13 उपागता (for इहागता)

16 ^{ab}) G तु, M5 द्वे (for first च) Ś V D0-4 8 12 13 सहस्र कुजराणा च(D0 तु), Ñ B1-3 गजेद्राणा सहस्र तु, D10 11 M1 2 गजाना दशसाहस्र (for ^{a}) Ñ1 B1 3 D3 4 हयानाम्, Ñ2 B2 हयाना च (for रथानाम्) D7 transp सहस्र and रथानाम् D4 अश्रुतं (for अयुत). Ś V B4 D0-4 7-13 G2 3 M5 तथा, Ñ B1-3 पर (for पुरे) —^{c}) M5 अयुत Ś V3 B4 D0 1 8 12 13 हयाना चायुत तत्र(B4 चात्र), Ñ B2 3 D3 रथाना प्र(B2 °ना चा, B3 D3 °नाम)युत चात्र (Ñ2 यत्र, D3 चैव), V1 2 B1 D2 हयानामयुत तत्र (B1 चैव), D4 हयाना नियुत चैव —^{d}) Ś Ñ1 B4 D1-3 8 12 13 G1 2 साग्रा कोटी, Ñ2 शत कोटी, V1 M1-3 साग्रकोटिश्, V3 D9 साग्रा कोटिश्, B2 साग्रे कोटी, D4 साग्रकोटि, D5 10 11 साग्रा कोटि, D7 साग्रकोटि, T3 सार्धकोटी, G3 साग्रकोटीश् (for साग्रकोटी)

17 ^{a}) B1 विश्राता Ś1 V B4 लब्धलक्ष्याश्, Ś2 बल-रक्षाश्, D0 2 8 12 लब्धलक्षाश्, D1 लब्धकक्ष्याश्, D3 लघु-लक्षाश्, D4 लब्धलक्ष्माश्, D13 लब्धरक्षाश् (for बलवन्तश्) —^{b}) Ś Ñ V B D0-4 8 12 13 सग्रामेष्वनिवर्तिन, D7 सयु-गेष्वपराजिता —^{c}) D4 हृष्टा (for इष्टा) —^{d}) Ñ1 B1-3 D1 4 एव (for एते)

18 ^{a}) Ś Ñ2 B1 2 D0-2 4 8 12,13 तु, V B4 D3 च, G2 [अ]र्थ-, Cr m g as in text (for [अ]न) Ś V3 B1 4 D0-4 8 12 13 G2 3 M5 Cm युद्धार्थं, V1 रक्षार्थं, Cr g t as in text (for युद्धार्थे) —^{b}) Ś D8 12 रक्षसा च, D6 राक्षसाना (for राक्षसस्य) —^{c}) Ś Ñ V1 2 B3 4 D0-4 8 T G2 परिवार-(D3 T3 °र), D5 G3 परीवार-, D7 9-11 M1-3 परीवार, Cg t as in text (for परिवार). —^{d}) Ñ2 V3 B1 2 4 D3 4 6 7 9-11 G3 M5 उपतिष्ठति —After 18, D0 ins

575* प्रतिद्वारमिय सख्या गुप्ते राम चतुर्गुणा।

19 ^{a}) D9 11 एव (for पुना) D4 गुप्ति च (for प्रवृत्ति) Ñ2 D1 4 13 G2 लकाया —^{b}) Ś1 V1 2 D0 2 3 13 अ(D13 न)नुप्रोच्य(Ś1 °वोच्य), Ś2 D8 12 अनुशोध्य, Ñ1 B1-3 तत्र प्रोच्य, Ñ2 तत्र प्रोक्ता, V3 अनुज्ञाप्य, B4 अनुगम्य, D4 अभिप्रोच्य, Cm t as in text (for मन्त्रिप्रोक्ता) —After 19^{ab}, D5-7 9-11 S ins

576* एवमुक्त्वा महाबाहू राक्षसास्तानदर्शयत्।
लङ्काया सचिवै सर्वं रामाय प्रत्यवेदयत्।

[M1 2 om 1 2 —(1 2) G2 लकाया D5 9 G2 सर्व, T2 3 M3 Cm g सर्वा, G1 सार्ध, G3 साऊ, Ct as above (for सर्वं) D5 T1 G2 प्रतिवेदयत् (T1 °यन्) (sic), Cm g t as above (for प्रत्यवेदयत्)]

—^{c}) D3 काम (for राम) —^{d}) V2 G2 वचनम्, Cm g t as in text (for उत्तरम्) Ś Ñ V1 3 B D0-2 4 8 12 13 इद पुनरु(Ñ2 B2 वाक्यमु)वाच ह, D3 इदं पुनरभाषत, M1 2 पुनर्वचनमब्रवीत् —After 19, D7 9-11 M3 ins, M5 cont. after 576*

577* रावणावरज श्रीमान्रामप्रियचिकीर्षया।

कुबेरं तु यदा राम रावणः प्रत्ययुध्यत ।
षष्टिः शतसहस्राणि तदा निर्यान्ति राक्षसाः ॥ २०

पराक्रमेण वीर्येण तेजसा सत्त्वगौरवात् ।
सदृशा येऽत्र दर्पेण रावणस्य दुरात्मनः ॥ २१

अत्र मन्युर्न कर्तव्यो रोषये त्वां न भीषये ।
समर्थो ह्यसि वीर्येण सुराणामपि निग्रहे ॥ २२

तद्भवांश्चतुरङ्गेण बलेन महता वृतः ।
व्यूहेदं वानरानीकं निर्मथिष्यसि रावणम् ॥ २३

रावणावरजे वाक्यमेवं ब्रुवति राघवः ।
शत्रूणां प्रतिघातार्थमिदं वचनमब्रवीत् ॥ २४

पूर्वद्वारे तु लङ्कायां नीलो वानरपुंगवः ।
प्रहस्तं प्रतियोद्धा स्याद्वानरैर्बहुभिर्वृतः ॥ २५

अङ्गदो वालिपुत्रस्तु बलेन महता वृतः ।
दक्षिणे बाधतां द्वारे महापार्श्वमहोदरौ ॥ २६

---

20 a) T2 तं (for तु) Ś D8 12 13 राजन् (for राम) —b) D0 1 8–11 प्रतियुध्यते (D8–11 °ति), D4 समयुध्यत (for प्रत्ययुध्यत) —c) V2 B2–4 D0 1 8 षष्टि, D6 शत (for षष्टि) B4 रथ- (for शत-) Ś D8 12 13 -सहस्राणां (for °णि) —d) Ś Ñ V B D0 2 3 8 9 11–13 G2 रक्षसा (for राक्षसा)

21 a) Ñ1 मद्भात्रा, Ñ2 B1 2 शौर्येण, B4 युद्धेन (for वीर्येण) —b) D7 सत्त्वेन च बलेन च —c) D6 7 T2 3 यत्र, D8–11 त्यत्र, G1 तस्य, G2 3 M5 यस्य, M1 2 एव, Cg as in text (for येऽत्र) D2 दर्पाच्च (for दर्पेण) Ś Ñ V B D0–4. 8 12 13 सदृशानि स्म (Ñ2 D0 13 °नि च, V1 2 °न्येव) सर्वाणि (B1 4 दर्पेण) —After 21, G1 ins

578* परिवारसहस्राणां कोटीशतमथाभवत ।

22 a) D8 अनु-, D4 9 तत्र (for अत्र) Ś D8 12 [अ]मर्षो, G2 मृत्युर् (for मन्युर्) B4 कार्यं ते (for कर्तव्यो). B2 अत्र माया न कर्तव्या —b) D8–11 कोपये, Cr m g k.t as in text (for रोपये) D3 त्वा —c) Ś2 [अ]स्य (for [अ]सि) —d) B4 असि (for अपि) Ś V2 3 D0 2 8 12 13 शातने, Ñ V1 B3 4 D1 शामने, B1 2 D4 नाशने (D4 °येत), T3 विक्रमे (for निग्रहे).

23 a) Ñ B2 3 चतुरङ्गस्य (B3 °श्च) (for चतुरङ्गेण). Ś D8 12 13 तद्भवान्हरिव (D13 °वी)र्याणा, V B1 D0–4 तद्भवान्हरि (D4 °निह)वीराणां (D2 °मन्येन), B4 उत्तराश्चतुरङ्गेश —b) B4 पुर्यां, D8–11 G1 Cr t वृत, Cg as in text (for वृत) Ñ B2 3 पर (B2 °रि)व्यूहस्य सयुगे —S2 D5 om (hapl) 23c – 26b B1 reads from 23c up to l 1 of 580* in marg —c) Ś1 V B1 D0–4 8 12 13 वि (Ś1 D8 12 13 म)क्षोभ्य राक्षसीं (D3 4 °सी-) सेना, Ñ B2 3 व्यूढार्क्ष (Ñ1 तदक्ष)वानरबल, B4 व्यूह ता वानरबलेन. —d) Ś1 D8 12 सवधिष्यति, Ñ B निहनिष्यति (B1 °सि), V D0–2 4 13 त (D4 त्व) वधिष्यसि (V1 °ति), D3 वधिष्यति हि, D11 T3 निर्मथिष्यति, T2 निर्मथिष्यसि, G1 M5 विधमिष्यसि (M5 °ति), Cg t as in text (for निर्मथिष्यसि) ❀ Cg. मध्यमपुरुषप्रयोगमार्षम् ❀

24 S2 D5 om, B1 reads in marg 24 (for both, cf v l 23) —a) Ñ B1–3 -[अ]वरजाद् (for -[अ]वरजे) V3 रावणावरजस्यास्य. —b) Ñ V3 B1–3 एतच्छ्रु (V3 एवं श्रु)त्वा स, V1 एवं वदति (for एव ब्रुवति) —c) M1 2 रिपूणा (for शत्रूणा) V3 ह्यावधातार्थम्, D0. 1 3 4 प्रतिषे (D1 °धा)धार्थम्. —d) D1. 2 13 एव (for इदं) —After 24, G2 M5 ins, G1 ins after 25.

579* मैन्दश्च द्विविदश्चैव नील· सेनापतिस्तथा ।
पूर्वद्वार प्रधावन्ता दीप्ताक्षय इवानला ।

[(l 2) G1 प्रधावता, M5 प्रधावनो (for प्रधावन्ता). G2 [अ]क्षय (for [अ]नला)]

25 S2 D5 om 25 (cf v l. 23) —a) D7. 9–11 पूर्वद्वार. T1 2 लकाया —b) G1 नीलो हरिचमूपति· —c) T1 M3 प्रहस्त-, Ck t as in text (for °स्तं) D6 T2 3 G2 M1 2 -यु (T3 -यो)द्धार्थं, Ck t as in text (for -योद्धा स्याद्) ❀ Cr प्रहस्तप्रतियोद्धा स्यादिति पाठ. ❀ —d) D5 युत· (for वृत·) M1 2 यूथपैः सह तिष्ठतु —For 25, Ś1 Ñ V B D0–4 8 12 13 G2 M5 subst, G1 cont after 579*

580* कपीनामुग्रवीर्याणा सहस्रैर्बहुभिर्वृत ।
नील प्रहस्त प्लवगो राक्षस प्रति धावतु ।

[V3 om l 1 B1 reads l 1 in marg. (cf v l 23) —(l 1) D0 बलेन महता वृत, G1 महस्र परिवारित (for the post half). —G2 om from l 2 up to st 27 —(l. 2) S1 D8 12 प्रवर, D2 प्लवगो (unmetric), D13 प्रवर (for प्लवगो) V2 transp प्रहस्त and प्लवगो V1 2 युधि गाहता, V3 प्रति गाहतु, B4 D0–2 प्रति धावता, D2 4 G1 M5 प्रतिबाध (D4 °ध्य)ता (for प्रति धावतु) S1 D8 12. 13 प्लव (D8 °व)गो राक्षस प्रति (for the post half)]
—After 25, G1 ins 579*.

26 S2 D5 om. 26a-b (cf v.l 23) G2 om 26 (cf v l. 580*) —a) V3 च (for तु). S1 Ñ V1 2 B D0–4 8 12 13 वालिन पुत्रो (for वालिपुत्रस्तु) —b) V3 प्लवंगश्च तु दक्षिण. —c) D0 दक्षिणं. B1 2 4 D0–2 धावता (for बाधता) Ś Ñ V2 3 B1 2 4 D8 12 G2 M5 द्वारि, D0 द्वार (for द्वारे).

Arya Research Team

हनूमान्पश्चिमद्वार निपीड्य पवनात्मजः ।
प्रविशत्वप्रमेयात्मा बहुभिः कपिभिर्वृतः ॥ २७

दैत्यदानवसंघानामृषीणां च महात्मनाम् ।
विप्रकारप्रियः क्षुद्रो वरदानबलान्वितः ॥ २८

परिक्रामति यः सर्वाल्लोकान्संतापयन्प्रजाः ।
तस्याहं राक्षसेन्द्रस्य स्वयमेव वधे धृतः ॥ २९

उत्तरं नगरद्वारमहं सौमित्रिणा सह ।
निपीड्याभिप्रवेक्ष्यामि सबलो यत्र रावणः ॥ ३०

वानरेन्द्रश्च बलवानृक्षराजश्च जाम्बवान् ।
राक्षसेन्द्रानुजश्चैव गुल्मे भवतु मध्यमे ॥ ३१

न चैव मानुषं रूपं कार्यं हरिभिराहवे ।
एषा भवतु नः संज्ञा युद्धेऽस्मिन्वानरे बले ॥ ३२

वानरा एव नश्चिह्नं स्वजनेऽस्मिन्भविष्यति ।
वयं तु मानुषेणैव सप्त योत्स्यामहे परान् ॥ ३३

G. 6 13
B 6 37
L. 6 13

---

27 G2 om 27 (cf v l 580*) —^{a}) B4 D0 1 3-5 12 13 पश्चिम (for पश्चिम) D7 -द्वारे, G3 M5 -द्वारि, Ck t as in text (for -द्वार) Ñ B1-3 पश्चिम नगरद्वार —^{b}) Ś D8,12 13 निर्यातु, Ñ V B1-3 D7 10 G1 3 निष्पीड्य, D2 प्रयातु, D4 निपीडत् (sic) (for निपीड्य) —^{c}) Ñ V B D1 निविशतु, D0 निवेशतु (sic), D2 विविशन्, D3 स विशतु, D4 निवसन् (for प्रविशतु) —^{d}) D6 T2 3 वानरैर् (for कपिभिर्) Ñ V1 2 B D0-4 G3 M5 transp बहुभि (B3 in marg) and कपिभिर् V1 D0-2 सह (for वृत) G1 M1 2 वानरैर्बहुभिर्वृत —For 27^{cd}, Ś D8 12 13 subst, D2 ins after 27^{ab}

581* इन्द्रजित्प्रतियुद्धार्थं वृतो वै वानरै सह ।
[D2 स तु (for सह)]

28 ^{a}) D1 मेघानाम् (sic), M1 2 -यक्षाणाम् (for सघानाम्) —^{b}) G1 3 सुकर्मणा (for महात्मनाम्) —^{c}) G1 2 M1 2 5 -कर (for -प्रिय) B4 D1 क्रुद्धो, D13 शूद्रो (for क्षुद्रो) Ś D8 12 विप्रकारी च य क्षुद्रो, V1 2 यश्चकारप्रिय क्षुद्रो, D0 विप्रकार कृत क्षुद्रो —^{d}) Ñ1 B1 2 4 वरदानाद् (for वरदान-) D4 M1 2 वरदानेन दर्पि(D4 गर्वि)त

29 ^{a}) Ś V3 B2 D8 पराक्रमति, Ñ2 B3 D7 T परिक्रमति, B4 परिक्रामयति (hypm), Cg k as in text (for परिक्रामति) —^{b}) V3 तापयति, D4 सनाशयन् (for सतापयन्) Ñ B1-3 लोकान्सत्रासयन्बलात् —^{c}) Ś V B1 D0-4 8 12 13 तस्य राक्षसराजस्य —^{d}) Ś N V B D0-2 4 8 12 13 रावणस्य, D3 सबलस्य (for स्वयमेव) Ś V1 D0-3 8 12 13 T3 वधे वृत, Ñ V2 B वधे स्थित, D4 च सवृत, D9 व्यवस्थित, Cv r g,k t as in text (for वधे धृत) ❀ Cg तस्याहमिति श्लोके यत्तच्छब्दाध्याहारेणाहशब्दद्वयनिर्वाह । योऽह धृत निश्चित सोऽह प्रवेक्ष्यामीत्यन्वय । स्वयमेव अद्वारेण। यद्वा तस्याहमित्यर्धान्तमेक वाक्यम्। उत्तरमित्यादि भिन्न वाक्यम्।, so also Ct ❀

30 ^{b}) B2 4 स्वय, M1 2 धन्वी, Ct as in text (for अह) —^{c}) D11 नि पीड्य T3 [अ]भिप्रवेश्यामि (for °क्ष्यामि) Ś B2 4 D0-4 8 9 12 13 G2 नि(D0 1 13 नि)-पीड्योपनिवेक्ष्या(Ś D8 12 °वेशा, D4 °विश्या, D13 °वत्स्या)मि, Ñ V1 2 B1 निपीड्य(Ñ1 V1 2 °डगो) परिवेक्ष्यामि —After 30, Ś D8 12 13 ins

582* तान्पुरद्वा स्थिताञ्शक्त समर्थ परिरक्षितुम्।
रामेणाधिष्ठित चैतद्वरुणेनेव सागरम्।

[(1 2) D13 रावण- (for रामेण) and [ए]व (for [इ]व)]

31 ^{a}) Ś D8 12 तु (for च) Ñ V2 B1-3 सुग्रीवो (for बलवान्) D4 वानरेन्द्रबलाध्यक्षो —^{b}) Ś D8 12 तु (for च) V2 3 D3 5 7 9-11 T1 M3 वीर्यवान् (for जाम्बवान्) Ñ B1-3 जाववाश्च तथर्क्षराट् —^{c}) G (ed) [अ]पि (for [ए]व) —^{d}) D0 2 4 Cm g गुल्मो, Cv as in text (for गुल्मे) B3 D3 भवति, M1 2 तिष्ठतु, Cm as in text (for भवतु) D0 2 4 6 9 T2 3 G1 M3 Cm g मध्यम (D4 °त), Cv as in text (for मध्यमे)

32 ^{a}) Ñ1 तु (for च) Ñ1 B1 T3 Cr [ए]व, D9 [इ]द, Cg t as in text (for [ए]व) —^{b}) Ñ B G1 2 कपिभिर्, Cr as in text (for हरिभिर्) Ś V D0-4 8 9 12 13 कपि(D9 हरि)भि कार्यमाहवे —^{c}) M1 2 नो भवतु (by transp) (for भवतु न) D5 T1 सज्ञा या, M3 सज्ञा नो (by transp) (for न सज्ञा) Ñ B1-3 न च न(B1 3 [*sup lin* as in Ñ1]प)श्येत युद्धे वै, V दृढ नश्यति युद्धेषु, B4 दृश्ये वादृश्ययुद्धे वै, D0 दृष्ट्वा नश्येत युद्धे तु, D1 दृश्येत प्रतियुद्ध तु, D2 दृश्यो नश्येत पुरुष, D3 4 दृश्यो-दृशो न(D3 °श्या न दृश्ये [sic]) युद्धे तु, D13 दृष्ट्वा नश्यति पुरुषा —^{d}) Ñ1 V3 B सज्ञा स्वे(B4 मे), Ñ2 V1 2 D1 4 सज्ञा(D1 °ज्ञा) वै, D0 2 3 13 सज्ञेय (for युद्धेऽस्मिन्) —For 32^{cd}, Ś D8 12 subst, D13 ins after 32

583* दृष्ट्वा नश्यति वै सज्ञा युद्धे वा मानुषे बले।
[D13 दृष्टा नश्यति वा सज्ञा (for the prior half) and वै (for वा)]

33 Ś D8 12 om 33^{ab} —^{a}) Ñ V B D0 वानरो, D13 वानरैर् Ñ B2 D0-2 4 ह्येव, V B1 3 4 ह्येष (for एव) Ñ2 B3 4 निश्चिह्न(B4 °ह्नो), V1 नि शक, V2 नि शंके, V3 निश्चह्न (sic), D1 चिह्न तु, D4 तच्चिह्नं, D10 11 G2 M1 2 Ck t वश्चिह्न, D13 तैश्चिह्न, Cm.g as in text (for

3 35 अहमेव सह भ्रात्रा लक्ष्मणेन महौजसा ।
7 35
3 31 आत्मना पञ्चमश्चायं सखा मम विभीषणः ॥ ३४

स रामः कार्यसिद्ध्यर्थमेवमुक्त्वा विभीषणम् ।
सुवेलारोहणे बुद्धिं चकार मतिमान्मतिम् ॥ ३५

ततस्तु रामो महता बलेन
प्रच्छाद्य सर्वां पृथिवीं महात्मा ।
प्रहृष्टरूपोऽभिजगाम लङ्कां
कृत्वा मतिं सोऽरिवधे महात्मा ॥ ३६

इति श्रीरामायणे युद्धकाण्डे अष्टाविंशतितमः सर्गः ॥ २८ ॥

नश्चिह्न) D3 वानरस्येव तच्चिह्न —^{b}) Ñ1 B1-3 स्वजनेषु, B4 वानरेषु, D4 साभिज्ञानं (for स्वजनेऽस्मिन्) —D13 om. from भविष्यति up to मम in 34^d. —^{c}) D7 एवं (for वयं) Ś D8 12 वयं भवतो मध्ये च, Ñ V B1 3 4 D1 4 वयं तु(Ñ1 B3 D1 च) रक्षसां सघान् (V D1 4 मध्ये), B2 वयं तु राक्षसान्सर्वान्, D0 2 3 वयं तु(D0 च) भवतां मध्ये —^{d}) D0 पूयो (sic), D4 मह (for सख). Ś D0 2 3 8 12 नरा , Ñ V B2-4 D1 4 जना , G2 पर. (for परान्)

34 D13 om up to मम in 34^d (cf v l 33) V3 om 34 —^{a}) Ś V1 D0-4 8 12 चैव, D5 Γ1 एष, M1 2 चापि (for एव) —^{b}) Ś Ñ V1 2 B D0-4 8 12 G2 3 [अ]मितौजसा(D4 °स) (for महौजसा) —^{c}) S2 D8 आत्मन. (for °ना) D4 [ए]व (for [अ]य). —^{d}) Ñ2 B1 सहायो मे, V1 B2 सखा मे स, D4 सखाय मे (for सखा मम)

35 D0 om 35 —^{a}) D5 7.10 11 T M3 Cm t कृत्य-, D0 सर्व-, Cg as in text (for कार्य-) Ś V B4 D0-4 8 12 13 सर्वकार्य(V2 B4 °म)प्र(V1 D4 °र्थं)सि(D3 °समृ)द्ध्यर्थम्. —^{b}) D2 एतद् (for एवम्) —^{c}) D13 Cm g बुद्धिश्, Ck t as in text (for बुद्धिं) —^{a}) Ś D8 12 लघुविक्रम , Ñ V B D0-4 13 M1 2 मतिमास्तदा(B3 D4 °था), D0-11 मतिमान्प्रभु , T3 सुमहामति , G2 3 मति मान्मन , Cm g as in text (for मतिमान्मतिम्) ❀ Cm सुवेलारोहणे प्रवृत्ता बुद्धिर्यस्य स सुवेलारोहणबुद्धि । अलुक् समासार्षम्। मतिमान् आगामिगोचरबुद्धिमान् मतिं चकार सुवेलारोहणेच्छा चकारेत्यर्थः । बुद्धिमिति द्वितीयान्तपाठे तु सुवेलारोहणं मतिं मननात्मिका बुद्धिं निश्चयात्मिका चकारेत्यर्थः । यद्वा बुद्धि तात्कालिकरूपा मतिं चकार अर्थनिर्धारणरूपा चकारेत्यर्थः । " अर्थनिर्धारण मति " इति तज्ज्ञाः, Cg सुवेलारोहणे विषये बुद्धि , बुद्धिमान्। मतुब्लोप आर्ष । मतिम् इच्छाम्। सुवेलारोहणे बुद्धि चकार मतिमान् मतिमिति च पाठ ❀ —After 35, D5 7 10 11 S ins.

584* रमणीयतर दृष्ट्वा सुवेलस्य गिरेस्तटम्।

36 D5 T1 om. 36 —^{a}) D0 2 13 तेन (for ततस्). Ś Ñ V B D1 3 4 8 12 स, D0 2 13 स्म (for तु) ❀ Ck ततस्तु राम इत्यादिवक्ष्यमाणसंग्रहश्लोकश्च न। नापि चोक्तिरनुवाद । नापीह पूर्वापरप्रकरणविच्छेद । अतः इम श्लोक वृथा प्रक्षिप्यात्र सर्ग विच्छिन्दन्ति। एवमेवं कुसृष्टितः ऋष्युक्तसर्गसख्याभ्यधिकदर्शनं जायते। अतो नात्र सर्गविच्छेद ।, Ct also cites Kataka ❀ —^{b}) D2 प्रसाद्य (for प्रच्छाद्य). G1 महतीं, M6 वसुधा, Cg as in text (for पृथिवीं). —^{c}) T3 अहृष्ट-, Cg as in text (for प्रहृष्ट-) B2 D9 हि, D4 [स]य (for सभि-) V3 [स]भिजनेन (for °जगाम). —^{d}) Ñ B1-3 शत्रु-, M1 2 वैरि-, M5 चारि- (for सोऽरि) Ñ2 सहायवान्, D6 T3 दृढात्मा, G2 M1 2 धृतात्मा, Cg as in text (for महात्मा) Ś V B1 D0-3 8 12 13 विभीषण चारविधौ नि(D1 प्र)यो(V2 3 B4 D1-3 °यु)ज्य, D4 विभीषण चारगतौ नियुज्यता

Colophon —*Kāṇḍa name* Ñ B1 3 4 D2 12 13 लका काडे, D0 4 सुदरकाडे —*Sarga name* Ś D8 12 विभागचिंता, Ñ1 B1 2 4 चारप्रवेश , Ñ2 [illegible]पन, V1 2 D13 सैन्य विभागचिंतनं(D13 °चिता), V3 सैन्यविभाग·, B3 लकाया चारप्रवेश , D0 सैन्यप्रविभागचिंतनं, D1 सेनाप्रविभागचिंता, D2 सैन्यप्रतिभागनचिंता, D3 लकाविधान, D4 लकाप्रतिबाधन, D9 विभीषणवाक्यं —*Sarga no* (figures, words or both) Ś1 Ñ1 D0 2 4 12 13 om , Ś2 Ñ2 V1 2 B D3 9 13 , V3 D8 11 , D1 15 , D5-7 10,11 T1.3 G M 37 , T2 36 —After colophon, D2 concludes with राम, G M1 2 5 with श्रीरामाय नम .

Anya Research Team

२९

स तु कृत्वा सुवेलस्य मतिमारोहणं प्रति ।
लक्ष्मणानुगतो रामः सुग्रीवमिदमब्रवीत् ॥ १
विभीषणं च धर्मज्ञमनुरक्तं निशाचरम् ।
मन्त्रज्ञं च विधिज्ञं च श्लक्ष्णया परया गिरा ॥ २
सुवेलं साधु शैलेन्द्रमिमं धातुशतैश्चितम् ।
अध्यारोहामहे सर्वे वत्स्यामोऽत्र निशामिमाम् ॥ ३
लङ्कां चालोकयिष्यामो निलयं तस्य रक्षसः ।
येन मे मरणान्ताय हृता भार्या दुरात्मना ॥ ४
येन धर्मो न विज्ञातो न वृत्तं न कुलं तथा ।
राक्षस्या नीचया बुद्ध्या येन तद्गर्हितं कृतम् ॥ ५
यस्मिन्मे वर्धते रोषः कीर्तिते राक्षसाधमे ।
यस्यापराधान्नीचस्य वधं द्रक्ष्यामि रक्षसाम् ॥ ६
एको हि कुरुते पापं कालपाशवशं गतः ।
नीचेनात्मापचारेण कुलं तेन विनश्यति ॥ ७

G 6 14
B 6 38
L 6 14

29

1 ^{a}) D4 सेतु कृत्वा समुद्रस्य —^{b}) Ś Ñ V B D0-4 8 12 13 बुद्धिम् (for मतिम्) —^{c}) B4 D1-4 13 -[अ]नुमतो, D0 -[अ]नुचरो (for °गतो) B3 लक्ष्मणश्चागतो (sic)

2 ^{a}) V3(marg) D3 सर्वज्ञम्, D6 धर्मज्ञो (with hiatus) —V3 reads 2^{b} in marg —^{b}) D7 च राक्षस (for निशाचरम्) —V3 om. 2^{cd}.—^{c}) Ñ1 M1 2 मन्त्रज्ञश्, D6 मित्रज्ञ D1 वा, D8 11 om (for first च) Ś Ñ2 V1 2 B1-3 D0-4 8.12 13 कृतज्ञ, Ñ1 कृतज्ञश्, B4 कुलज्ञ, M1 2 विविज्ञश्, Cm g t as in text (for विधिज्ञ) D1 वा (for second च) —^{d}) D5 om (hapl) परया Ś V1 2 B1 4 D0-3 8 12 मधुर श्लक्ष्णया गिरा, D4 13 M1 2 श्लक्ष्ण मधुरया गिरा

3 ^{a}) Ñ1 B1-3 अथ, Ñ2 चाथ (for साधु) B1 शैलेशम् —^{b}) Ś D8 12 आशु, B4 D2 T3 G3 इद (sic) (for इम) Ś V1 3 D0-2 8 12 13 सानु- (for धातु-) D2 शतैर्वृत्त, G3 -विभूषित, M5 -निषेवितं —Ś1 om 3^{c}-4 —^{c}) Ś2 V1 B1 D0-4 8 12 13 अधिरोहामहे —After 3, Ñ V2 B1-3 ins

585* दुर्गम चेव यत्किंचित्कारित तेन रक्षसा।
राक्षस त च द्रक्ष्याम कथचिद्यदि रावणम्।

[(1 2) B2 transp यदि and रावणम्]

4 Ś1 om 4 (cf v l 3) —^{a}) Ś2 B1 4 D0 1 3 8 12 13 G1 2 M5 आलोकयिष्यामो (B4 D1 °मि), V3 D5 6 T2 चालोकयिष्यामि, D2 G3 आरोहयिष्यामो —^{b}) Ś2 Ñ2 V B1 4 D0-4 8 12 13 रावणस्य च (V3 तु) (for तस्य रक्षस) —^{c}) Ś2 D8 12 [आ]त्म-, D0 वै (for मे) Ś2 V D0-4 8 12 13 जीविताताय, Ñ B1 3 4 मर्तुकामेन (for मरणान्ताय) B2 येनास्मन्मृत्युकामेन, D13 येनात्मजविनाशाय —^{d}) V2 D11 [आ]हृता (for हृता) Ś2 Ñ V B D0-4 8 12 13 यश(Ñ2 मन, V3 तप)स्विनी (for दुरात्मना)

5 ^{a}) D13 जानीतो (sic) (for विज्ञातो) —^{b}) Ś V1 D0-2 8 12 13 कुल, Ñ1 कृत, D5 T1 वित्तं (for वृत्त) M3 तद्वृत्त (for वृत्त न) Ś V B4 D0-4 8 12 13 कुलशालिना (for न कुल तथा) —^{c}) Ś D0 9 12 रक्षसा (for राक्षस्या) Ñ B G1 जिह्मया, Cm t as in text (for नीचया) —^{d}) T3 तेन Ś2 B1 D8 12 13 [ए]तद्, D3 वै, D4 [इ]द (for तद्)

6 D10 11 om, while B (ed) reads 6–7 within brackets D6 om 6^{ab} —^{a}) Ś V B4 D1-3 8 12 13 त(V2 य)स्माद्वि-, Ñ B1 3 तन्मे वि-, B2 तेनैव, D0 तस्माद्वि, D5 T1 अस्मिन्मे, T2 3 G M3(before corr as in text) 5 Cg तस्मिन्मे (for यस्मिन्मे) D1 3 M3 Cg -वर्तते (for वर्धते) Ś D8 12 13 क्रोध D4 तस्माद्विवृद्धरोष सन्, D7 9 अस्मिन्वर्धति मे कोप —^{b}) Ś V1 2 D0-4 8 12 13 स्मृत्वा त (Ś D8 श्रुत्वैत, D12 श्रुत्वा त) पापराक्षस, Ñ B पापं सकीर्त्य (Ñ2 °चित्य, B1 °स्मृत्य) राक्षस, V3 स्मृत्वा त राक्षसेश्वर —^{c}) D0 पश्य, D6 यथा, D8 T2 तस्य (for यस्य) Ś V1 B4 D0 2 3 8 12 13 [अ]पचा(B4 °का)रान् (for [अ]पराधान्) D4 एकस्य (for नीचस्य). —^{d}) Ś Ñ V B D0-3 8 12 13 सर्वान्धक्ष्या(Ś D8 12 °न्हन्या, D13 °न्वध्या [sic])मि राक्षसान्, D4 वधिष्ये सर्वराक्षसान्, G भय(G2 वध) गच्छति राक्षसा, M5 वध धक्ष्याम राक्षसान् —After 6, Ś Ñ V B D0-4 8 12 13 ins

586* बाणैर्वज्राशनिप्रख्यैरसुरानिव वासव ।

[Ñ B1-3 वज्रानल-, D3 शक्राशनि- V1 -स्पर्शैर्, D8 -मुख्यैर् (for -प्रख्यैर्) B4 दानवान् (for असुरान्)]

7 D10 11 om, while B (ed) reads 7 within brackets (cf v l 6) —^{a}) Ś D8 12 13 को हि तद्, V D3 एकश्च, B4 D0 1 3 एकस्तु, D4 एवस्तु (metri causa) (for एको हि) —^{b}) Ñ2 -वेग-, V3 B1 पाशे (for -पाश-) D1 वशानुग (for -वश गत) Ś D8 12 13 कालस्य वशमात्मन (Ś2 D13 °गत) —^{c}) Ś Ñ V B D0 1 3 4 8 12 13 नीचस्यात्म (B4 °र्थं), D2 G (ed) नीचस्त(G[ed] °स्या)स्य, D9 तेन चात्म-(for नीचेनात्म-) Ñ V2 3 B D6.7 T2 3 G M1 2 5 -[अ]पराधेन, V1 -[उ]पचारेण, D4 -[अ]पकारेण (for -[अ]पचारेण) —^{d}) Ś V D0-4 8 12 13 येन,

एवं संमन्त्रयन्नेव सक्रोधो रावणं प्रति ।
रामः सुवेलं वासाय चित्रसानुमुपारुहत् ॥ ८
पृष्ठतो लक्ष्मणश्चैनमन्वगच्छत्समाहितः ।
सशरं चापमुद्यम्य सुमहद्विक्रमे रतः ॥ ९
तमन्वरोहत्सुग्रीवः सामात्यः सविभीषणः ।
हनूमानङ्गदो नीलो मैन्दो द्विविद एव च ॥ १०
गजो गवाक्षो गवयः शरभो गन्धमादनः ।
पनसः कुमुदश्चैव हरो रम्भश्च यूथपः ॥ ११
एते चान्ये च बहवो वानराः शीघ्रगामिनः ।
ते वायुवेगप्रवणास्तं गिरिं गिरिचारिणः ।
अध्यारोहन्त शतशः सुवेलं यत्र राघवः ॥ १२

Ñ1 B यस्य, Ñ2 सर्वं, D2.9 G1 2 तस्य, G (ed) पश्य (for तेन) Ñ B1 2 विनश्यति

8 a) B2 T2 3 स, D3 om (subm) (for स-). Ś D0 2.8 12 13 समस्य कार्त्स्न्य , Ñ B2 स(B° स)मन्त्रयामास, D1 सवर्णयन्नेव —b) Ś V2 3 D0 1 3 8 12 13 संक्रुद्धो(V2 °द्धे), V1 शत्रुत्वे (for सक्रोधो). —cd) D0 शैल (for राम) Ñ2 B3 D6 सुवेल-. V D0 1 3 4 आरोहत् ; D2-11 आमाद्य (for वासाय) B4 चित्रकेतुम् Ñ B1-3 उपागमत, G M5 अधारुहत, M1 उपाहरत(sic), Cg as in text (for उपारुहत). V D0 1 3 4 वासार्थं कृतभावन (for d). Ś D2 8 12 13 शीघ्र सुवेलमारोहद्वासार्थं चित्रकाननम्.

9 a) Ñ1 B2.4 D7 8 G2 3 M5 चैनम्, V1 3 D0-4 12 त्वेनम्, D12 चेतम्, G1 चैव (with hiatus) (for चनम्) —b) Ñ1 D4 12 अनुगच्छन (sic) —c) Ś V D0-4 8 12 13 धनुर् (for चापम्). D3 उत्क्रम्य. —d) D6 T2 3 सुमहान्. Ś D2 8 12 13 विक्रमोदये(Ś2 D2 12 °य), Ñ V B2 4 D0 1 3 4 विक्रमोप(B4 °य)मः B1 2 भीमविक्रमे(B2 °म) (for विक्रमे रत). G1 3 M5 महातेजा महाबल

10 a) Ś Ñ V2 3 B1-2 D0 2 3 8 12 13 अन्वा(Ñ1 °या)रोहच्च, V1 अन्वारोहन् (subm), B4 D1 5 T1 अन्वा-(B4 समा)रोह, D4 अध्यरोहत, D9-11 तमन्वारोहन (for तमन्वरोहन). G M5 सुग्रीवश्च महाबाहु —b) B4 D1 5 T1 G M1.2 5 च(D4 तु) विभीषण —D10 11 om, while B(ed) reads within brackets 10c – 12b —cd) B4 D9 मैन्दो नीलो (by transp) Ś D8 12 द्विविद (for द्विविद) & Cg हनुमानिति पृथगुक्त्वा रामलक्ष्मणौ पञ्चसेनारूढाविति गम्यते &

11 D10 11 om, while B(ed) reads within brackets 11 (cf v l. 10) —a) Ñ V1 2 B गयो (for गजो) —b) D1 ऋषभो (for शरभो). —B1 reads 11c – 12b (including 587*) in marg —c) G कुमुद पनसश्च (by transp). G (ed) वृत्रो (for चैव) —Ñ2 illeg from रम्भश्च in 11d up to l 1 of 587*. —d) Ñ B1-3 वृत्रो, B4 नीलो, D7 तारो (for हरो) D8 वीर्यवान् (for यूथप). Ś V1 2 D0-4 8 12 13 G1 पृथुश्च (D4 पृष्ट च, G1 दमश्च) हरियूथप (D2 4 °पा), V3 पृथुश्च विपृथुस्तथा, D9 G2 3 M5 रभो दंभश्च यूथप(G2 वानर), G (ed.) नलश्चैव तु यूथप. —After 11, Ñ V B1(m) 2 3 D0-2 8 B (ed , within brackets) Cm.g ins

587* जाम्बवाश्च सुषेणश्च प्रघसश्च महामतिः ।
दुर्मुखश्च महातेजास्तथा शरभरिष्टकपिः ।

[Ñ2 illeg for l 1 —(l 1) D8 T1 M5 क्रथमन्, D6 T2 3 G M5 करभश्च (for शरभ). Ñ V B1-3 G(ed) ऋक्षश्च(G[ed] सु-) नदावर , D7 शरभश्च महाकपिः (for the post half). —V3 om from l. 2 up to 12b. —(l. 2) Ñ2 स (for च) Ñ V1 2 B1-3 -षीस्त्र (for -षेणाद्य) M1.2 दरि (for वपा).]

12 D10 11 om, while B(ed) reads within brackets 12ab (cf v.l 10) V3 om 12ab, B1 reads 12ab in marg (for both, cf. v l 11) —a) D1 om second च (subm) T2 कपयो (for वहवो) —b) Ś1 शीघ्रवाहिन , Ś2 °चारणा , Ñ B2 4 °चारिण ; V1 2 D0-4 °विक्रमा ; D5 शचिवानरा (sic), Cg as in text (for शीघ्रगामिन) —After 12ab, Ś Ñ V1 2 B D0-4 7 11 12 ins , V3 ins before 12cd, while D7 G M5 K (ed, within brackets) ins l 2-5 after 12.

588* अध्यारोहदथोदग्रा जाम्बवन्तो महाशिलाः ।
तत्र सुवेलमास्थाय रामस्तेन सह वानरैः ।
निषसाद गिरेस्तस्य शृङ्ग उन्नतशिलातले ।
तत्र कपिगणाः सर्वे समावृत्य त्रियोजनम् ।
आरोहन्त सुवेलं तु प्लवन्तो दक्षिणामुखाः । [5]

[(l 1) Ñ2 illeg , V1 2 वरोहन्ना , B1 2 अवेरोह्य (B2 °य), B3 (before corr. as above) अवेरान्य, D3 4 ध्योदया (for अवोदग्राः). Ś D8 12 अन्वारोहन्नवोदग्राः, B4 अथारोहदनन्ते (for the prior half) V D0 2 शा(V2 3 पा)नयनो V2 महावरा (sic), B4 महीधर; D3 विशारदा (for महाशिला). Ñ B1-3 वन्नतो महागिरिं (for the post half). —(l 2) B4 आमाद्य (for आरुह्य) Ś D8 12 वानरै सह (by transp.), Ñ B2 3 सह यूथप , B1 हरिभि सह (for सह वानरै). D3 राम सौमित्रिणा सह (for the post half). —(l 3) B4 गिरौ तस्मिन्, G3 गिरि-प्रस्थे (for गिरेस्तस्य) B4 रम्ये सम-, D0 शृङ्गे मणि-, D1 सम-स्पर्श- (for शृङ्गे सम-) Ñ D7 G M5 -तले शुभे (for -शिलातले). B2 शुभे चारुतरे विभु (for the post. half) —(l. 4) Ñ2 -शिला (sic), B2 om. (for -गणा) Ñ2

ते त्वदीर्घेण कालेन गिरिमारुह्य सर्वतः ।
ददृशुः शिखरे तस्य विपक्तामिव खे पुरीम् ॥ १३
तां शुभां प्रवरद्वारां प्राकारवरशोभिताम् ।
लङ्कां राक्षससंपूर्णां ददृशुर्हरियूथपाः ॥ १४
प्राकारचयसंस्थैश्च तथा नीलैर्निशाचरैः ।
ददृशुस्ते हरिश्रेष्ठाः प्राकारमपरं कृतम् ॥ १५
ते दृष्ट्वा वानराः सर्वे राक्षसान्युद्धकाङ्क्षिणः ।
मुमुचुर्विपुलान्नादांस्तत्र रामस्य पश्यतः ॥ १६
ततोऽस्तमगमत्सूर्यः संध्यया प्रतिरञ्जितः ।
पूर्णचन्द्रप्रदीपा च क्षपा समभिवर्तते ॥ १७

G 6 14
B. 6 38.
L 6 14

V3 B1-3 समाक्र(Ñ2 °ग)म्य, V1 D0 समाश्रि(D0 °स्)त्य (for समावृत्य) D7 G M5 द्वियोजन D13 शतमाश्रित्य योजन (for the post half) —(1 5) V2 D2 आरोहति, D4 आरोहण (for आरोहन्त) D3 om तु (subm) Ś D8 12 13 आरोहति सुवेलस्य, Ñ B D7 G1 सुवेलमभ्य(B1 3 D7 G1 °ध्या, B2 °ध्य)रोहत(D7 °स्ते), G2 3 M5 सुवेलमध्यमारोहन् (for the prior half) Ś V2 B4 प्लवते, B2 प्लवगा]

—c) D3 वायुवेगे Ñ1 B1 3 -प्रतिमास, V3 D1 -[आ]प्रवणास्, D5 T1 प्रच(D5 °चु)रास्, G2 प्रवरास्, M1 2 -सदृशास्, Cv r m g t as in text (for -प्रवणास्) Ś Ñ2 V1 2 B4 D0 2 4 8 12 ते वायुवेगा प्लवगाम्, D13 तेषा सुवेगा प्लवगास् —d) B4 तद्गिरि —e) B4 अभ्यारोहत

13 a) B2 तेषि, D0 त तु, D1 ते च, D4 तत्र (for ते तु) V2 3 D1 4 दीर्घेण (sic) (for [आ]दीर्घेण) —b) Ñ B1-3 आसाद्य (for आरुह्य) V2 D3 G2 सर्वेश, D6 T2 सत्वरा —After 13ab, D0 ins

589* तामुदग्रगृहाकीर्णां तोरणैरुपशोभिताम् ।

—For 13c-15b, V1 subst 1 3-6 of 590*. —c) B2 तस्मिन्, G1 2 M5 लका, Cg k t as in text (for तस्य) Ś V2 B4 D0 2 4 8 12 13 शिख(Ś D8 विव)रात्तस्माद् (for शिखरे तस्य) Ñ1 B3 शिखरे तस्य शैलस्य —d) Ś V2 D8 9 12 13 विभक्ताम्, B1 2 4 विवि(B4 °भु)क्ताम्; D1 3 6 T3 निविष्टाम्, D4 विलग्नाम् V3 D2 इव ता(D2 ते), D1 3 दुर्गमा (for इव खे) T2 निविष्टामिव खेचरीं, G1 2 M5 त्रिकूटस्य निवेशिता

14 For subst in V1, cf v l 13 and 15 —a) Ś B4 D0-2 4 8 12 13 G सु(G1 स)वप्रा, D3 सुगुप्ता (for शुभा प्र-) G महाद्वारा (for -वर°) —b) D0 प्राकारवन-, D11 °मिव, M3 °परि (for °वर-) D13 -शोभना (for शोभिताम्) —c) B4 नाना- (for लङ्का) Ś D8 12 L (ed) लका च(L [ed] om [subm]) राक्षसै पूर्णा —d) T2 हरिपुगवा G2 ददर्श हरियूथप

15 a) T2 प्रासाद-, D10 11 M1 2 Ck t वर-, T3 -चर्या, Cr m g as in text (for -चय) Ś D2 3 8 12 13 वलभीसस्थैस्, B4 -[आ]भरणै स्तथैस्, D0 1 -धरणीसस्थैस्, D4 धरणीयैस्तैस् (for -चयसस्थैश्च) —b) Ś B4 D0-4 8 12 13 तमो-, M3 तदा (for तथा) T2 नीचैर्, T3 वीरैर् (for नीलैर्) D7 9-11 च राक्षसै (for निशाचरै) —For 14-15b, Ñ V2 3 B1-3 subst, whereas V1 subst 1 3-6 for 13c-15b

590* ता सुवप्रा वरद्वारा प्राकारवरशोभिताम् ।
नानाराक्षससंपूर्णां पताकाध्वजमालिनीम् ।
सज्जयन्त्रोपकरणा समुच्छ्रितध्वजाकुलाम् ।
सिताभ्रचयसकाशा कैलासशिखरोपमाम् ।
नानारूपैर्महावीर्यैर्घोरै रक्षोभिराकुलाम् । [5]
प्राकारवडभीसस्थैस्तमोनीलैर्निशाचरै ।

[(1 1) Ñ1 ताम्रवप्रा, B1 ता सुरथ्या, B2 3 ता सुरूपा (for ता सुवप्रा). Ñ B1-3 महाद्वारा(B3 [*sup lin* also] °कारा) G (ed) प्राकारैरुप- (for प्राकारवर-) B1 -तोरणा —(1 2) B1 लका (for नाना-) —(1 3) Ñ1 -महागृहा, Ñ2 -शिलायुधा, V1 illeg, V2 - * कुला (illeg), V3 -वरायुधा, B2 -शिलागुहा, B3 -कुलाकुला (for -ध्वजाकुलाम्) —V3 om 1 4-5 Ñ2 illeg for the post half of 1 4 —(1 5) G (ed) आवृता (for आकुलाम्) —(1 6) Ñ1 -चयनी-, V -धरणी- (for -वडभी-) B3 च राक्षसै (for निशाचरै) —B3 (m) ins after 1 6, V1 2 ins after 1 5 and V3 ins after 1 3 the line of 14cd (with v l लका वर्ष(V3 रक्ष)वरद्वारा in V1 3 and लका रक्षोगणैर्भीमा in B3, for 14c)]

—c) Ś1 हरिश्रेष्ठै (sic), Ñ B1-3 महावीर्या (for हरिश्रेष्ठा) —d) Ś2 V2 B4 D8 परम कृत(B4 शुभ), Ñ2 समलकृत, D2 अपर परात् (for अपर कृतम्)

16 ab) D3 ते ह (hypm), D10-12 त (for ते) D3 वानरान्सर्वे राक्षसा, T2 राक्षसान्सर्वे वानरा (by transp), G राक्षसान्सर्वान्वानरा (for वानरा सर्वे राक्षसान्) —c) Ś Ñ V B2 3 D0 2 4 8 12 13 ससृजुर् (for मुमुचुर्) B2 3 D5-7 9-11 T1 M3 विविधान्नादास्, G1 M5 विपुल नाद (for विपुलान्नादास्) B4 व्यसृजन्विविधास्तत्र —d) B4 नादान्, D4 7 10 11 T3 G1 3 M1 2 तस्य, G2 यत्र (for तत्र) Ñ B1-3 मेघान्दृष्ट्वेव वर्हिण

—Ta.2 om. l. 88-94.—(l. 88) Ba Da तनुपात्मन्य (for उपसंगम्य) Ba एवमित्यार्त्त चैव (for the prior half). Ñ1 V2 B2 4 हर्षं (for शोकं) V2 Da वायुर्वचनमब्रवीत् (for the post. half).—(l. 89) Note hiatus between the two halves. Ñ2 स्मारमान Ś1 V2 Da तदा, Ñ1 V2 B2 सदा, Ñ2 B2 प्रभो, B4 तथा, D2 12 हरि (for कृत).—(l. 90) V2 देवानां (for भगवान्). Da भगवा स्वयम्भू (for the prior half) —V2 illeg. for the post. half D12 नुरागः (for ऽवतारित).—(l. 91) Ś Da 12 देव (for देवं). V2 भुजगानां भयावहं (for the post half) —(l. 92) Da असमाद्(for घोरात्). Ś Da 12 स सर्पबन्धनाद्घोरा (for the prior half). Ñ2 वै मोचयिष्यति, V2 B2 ममोक्षयिष्यति (for समोचयिष्यति) —(l. 93) Ś V2 B2 Da 12 तस्य तद् (for स तस्य) —(l. 94) Ñ2 रामो (for देवं) Ñ V2 B1 2 भुजगानां, D1 पन्नगानां (for भुजगानां) V2 B1 विनाशनं, D12 महाभयं (for भयावहं)

26

(l. 1) Da निनिश्वसन्.—(l. 2) Da विनि श्वस्य, Ta M1.2 निश्वस्य (for विनि श्वस्य) —(l. 3) D7 9-11 क्रूर Ta घोर, G2 M2 वीर, M1 2 तत्र (for शूर). —(l. 4) G1 M2 शूर, G2 घोर (for वीर). —(l. 5) Ta वीर (for राम) Ta G1 2 M1 2 6 transp वानरैः and सह —(l. 7) M1 2 भीमैर् (for सार्धं). —(l. 8) Da Ta G2 M1 2 transp. अश्वै and रथैः. G2.1

पताकाध्वजचित्रैश्च रथैश्च समलंकृत· ।
ततो विचित्रकेयूरमुकुटैश्च विभूषित । [10]
तनुत्राणि च सवृत्य सधनुर्निर्ययौ द्रुतम् ।
पताकालकृत दीप्त तप्तकाञ्चनभूषितम् ।
रथ प्रदक्षिण कृत्वा समारोहच्चमूपति· ।
यष्टिभिस्तोमरैश्चित्रै शूलैश्च मुसलैरपि ।
भिण्डिपालैश्च पाशैश्च शक्तिभि पट्टसैरपि । [15]
खड्गैश्चकैर्गदाभिश्च निशितैश्च परश्वधै· ।
पदातयश्च निर्यान्ति विविधा शस्त्रपाणय· ।
विचित्रवासस सर्वे दीप्ता राक्षसपुगवा. ।
गजा मदोत्कटा शूराश्चलन्त इव पर्वता. ।
ते युद्धकुशला रूढास्तोमराङ्कुशपाणिभि । [20]
अन्ये लक्षणसयुक्ता शूरारूढा महाबला ।
तद्राक्षसबल घोर विप्रस्थितमशोभत ।
प्रावृट्काले यथा मेघा नर्दमाना सविद्युत· ।
नि सृता दक्षिणद्वारादङ्गदो यत्र यूथप: ।

तेषां निष्क्रममाणानामशुभ समजायत । [25]
आकाशाद्विघनात्तीव्रा उल्काश्चाभ्यपतंस्तदा ।
वमन्त्य· पावकज्वाला· शिवा घोरा ववाशिरे ।
व्याहरन्ति मृगा घोरा रक्षसा निधनं तदा ।
समापतन्तो योधास्तु प्रास्खलन्भय दारुणम् ।
एतानौत्पातिकान्दृष्ट्वा वज्रदष्टो महाबल । [30]
धैर्यमालम्ब्य तेजस्वी निर्जगाम रणोत्सुक: ।
तास्तु निष्क्रमतो दृष्ट्वा वानरा जितकाशिन: ।
प्रणेदु सुमहानादान्दिश· शब्देन पूरयन् ।
तत प्रवृत्त तुमुल हरीणा राक्षसै· सह ।
घोराणा भीमरूपाणामन्योन्यवधकाङ्क्षिणाम् । [35]
निष्पतन्तो महोत्साहा भिन्नदेहशिरोधरा ।
रुधिरोक्षितसर्वाङ्गा न्यपतन्धरणीतले ।
केचिदन्योन्यमासाद्य शूरा परिघपाणय: ।
चिक्षिपुर्विविध शस्त्र समरेष्वनिवर्तिन ।
द्रुमाणा च शिलाना च शस्त्राणा चापि निस्वन. । [40]

संयुत, Cg as above (for सयुक्त) G3 सुमाबल, M1 2 स महाबल (for सुमहाबल) —M1 2 om 1 9 —(1 9) T3 G1 पताक-. G3 M5 पताकाभिध्वजैश्चित्रैर् (for the prior half) D7 9–11 बहुभि, G3 M5 गर्जैश्च (for रथैश्च). D5 T1 G1 2 समलङ्कृतै —(1 10) D7 M1 2 -केयूर D5 T1 3 G M3 5 -मकुटैश्च, D6–11 मुकुटेन, T2 -मुकुटे स- (for मुकुटैश्च) G3 विराजित (for विभूषित) D7 मुकुटेन विभूषित, M1 2 किरीटी सुविभूषित (for the post half) —(1. 11) D5 T1 तु, D9 [ए]व (for च) G1 तनुत्राणानि D6 M3 Cg संख्य, Cv r m as above (for सवृत्य) D10 11 M1 2 Ck t तनुत्र च समावृत्य (for the prior half) G3 धनुष्मद्भिर्ययौ द्रुत (for the post. half) —(1 12) D6 T1 2 G3 M3 -भूषण (for भूषितम्) —(1 13) T3 G2 प्रदक्षिणीकृत्य —(1. 14) D10 11 Ck t ऋष्टिभिस्, M1 2 शक्त्यृष्टि, Cg as above (for यष्टिभिस्) D7 9–11 T3 ऋक्ष्णैश् (for शूलैश्). M1 2 निशितैर् (for मुसलैर्) —(1 15) D5 6 9 भिदिपालैश् D6 7 9–11 T3 चापैश् (for पाशैश्) M1 2 गदाभि (for शक्तिभि) D6 7 9–11 M5 पट्टिशैर् (for पट्टसैर्) G1 2 पट्टसै कूट (G2 शूल) मुद्गरै (for the post half) —(1 16) G1 चित्रैर् (for चक्रैर्). M1 2 हुलैस्तीक्ष्णैर् (for गदाभिश्च) G2 विविधैश् (for निशितैश्). —(1. 17) M1 2 तु (for च). M1 2 निर्याता —(1 18) M1 2 भूषिता राक्षसप्रभा (for the post half). —(1. 19) G1 जग्मुर् (for गजा) M1 2 चैव (for शूराश्च). —(1 20) T2 ये (for ते) G1 M3 -कुशलै (for °ला) M5 योधास् (for रूढास्) D5 T1 M1 2 आरूढा युद्धकुशलैस् (for the prior half) T3 G2 3 M5 -पाणय, I3 -चोदिता (for पाणिभि). —(1 21) G2 -सपन्ना, Cv m g t as above (for -संयुक्ता) D7 शूरा दृढ, G2 M5 अश्वारूढा (for शूरारूढा) D6 T2 G3 M5 महाजवा, G1 °गजा, M1 2 च निर्गता (for महाबला) —After 1 21, K (ed) (within brackets) ins

1* अथा परिपतन्ति स्म राक्षसैश्च प्रचोदिता ।

—(1 22) D6 9–11 सर्वे, M1 2 भीम (for घोरे). D10 सप्रस्खलितम् —(1 23) D6 महा (for यथा). D7 9 समतत (for सविद्युत) —(1 24) M1 2 नि सृत (for निःसृता). D9 G3 द्वारम् (for द्वारात्) G2 3 वानर (for यूथप). —(1 26) D6 M1 2 विमलात् (for विपुलात्) D9–11 T3 G3 तीव्रद्; G1 2 M5 वृष्टिर् (for तीव्रा) D6 T1 G1 M1 2 [अ]भ्यपतस्तदा; D7 T3 न्यपत°, G2 M5 पतितास्तदा, G3 [अ]भ्यवपद्यत (for [अ]भ्यपतस्तदा). D9–11 उल्मुकान्यपतस्तदा (for the post half) —(1 27) M1 2 पावकज्वाला M3 घोर (for घोरा) —(1 28) D5 T1 G3 M5 व्याहरतो, D10 11 M1 2 Ck t व्याहरत (for °रन्ति) T3 G3 घोर, Ct as above (for घोरा). D7 तथा —(1 29) D7 समापतत M1 2 च (for तु) G1 ते यूथा (for योधास्तु) M1–3 प्रास्खलन्भयमोहिता (for the post half). —(1 32) D9–11 विद्रवतो (for निष्क्रमतो). G2 -काशिभि —(1. 33) G1 2 M5 विनेदु (for प्रणेदु) D7 सुमहान्, D9 सहसा (for सुमहा-). G M1 नाद (for -नादान्). T3 नादयन् (for पूरयन्) M1–3 पूरयतो (M3 °श्च) दिशो दश (for the post. half). ❀ Cv पूरयन् पूरयन्त । वचनव्यत्ययेन बहुवचनस्य स्थाने एकवचनम् ।, Cr m नादयन् नादयन्त । वचनव्यत्यय आर्ष ।, Cg पूरयन् अपूरयश्चेत्यर्थ । केचित्तु पूरयन् पूरयन्त इत्यर्थे वचनव्यत्यय आर्ष इत्याहु ।, Ct पूरयन् पूरयन्त । आर्षमेकवचनम् ❀ —(1. 34) M1 2 सग्राम, Cr m.g t as above (for तुमुल) D6 तत सुतुमुल युद्ध (for the prior half) —(1 35) D5 I1 वेगानाम्, M5 कर्मणाम् (metri causa) (for -रूपाणाम्). —(1 36) G1 निष्क्रमतो, M1 2 युध्यमाना (for निष्पतन्तो) T1 छिन्न (for भिन्न). T2 -केश- (for -देह) —(1 37) M3 न्यवर्तन् (for न्यपतन्) D5 T1.3 M3 जगतीतले —(1 38) D7 9–11 -बाहव (for पाणय). —(1 39) D6–11 विविधाञ्शस्त्रान्, G1 निशितान्शस्त्रान्; G2 M5 भिण्डिपालै (M5 °विधै) शस्त्रै (for विविध शस्त्र). —(1 40)

Anvi Research Team

श्रूयते सुमहास्तत्र घोरो हृदयभेदन ।
रथनेमिस्वनस्तत्र धनुषश्चापि निस्वन ।
शङ्खभेरीमृदङ्गाना बभूव तुमुल स्वन ।
केचिद्रथानि सत्यज्य बाहुयुद्धमकुर्वत ।
तलश्च चरणैश्चापि मुष्टिभिश्च द्रुमैरपि । [45]
जानुभिश्च हता केचिद्विन्नदेहाश्च राक्षसा ।
शिलाभिश्चूर्णिता केचिद्वानरैर्युद्धदुर्मदै ।
वज्रदंष्ट्रो भृश क्रुद्धो रणे वित्रासयन्हरीन् ।
चचार लोकसंहारे पाशहस्त इवान्तक ।
बलवन्तोऽभ्यविष्यो नानाप्रहरणा रणे । [50]
जघ्नुर्वानरसैन्यानि राक्षसा क्रोधमूर्छिता ।
निघ्नतो राक्षसान्दृष्ट्वा सर्वान्बालिसुतो रणे ।
क्रोधेन द्विगुणाविष्ट सवर्तक इवानल ।
तत्राक्षसगणान्सर्वान्वृक्षमुद्यम्य वीर्यवान् ।
अभ्यद्रवत क्रोधताम्राक्ष सिंह क्षुद्रमृगानिव । [55]
चकार कदन घोर शक्रतुल्यपराक्रम ।

अङ्गदाभिमुखास्तत्र राक्षसा भीमविक्रमा ।
विभिन्नशिरस पेतुर्निकृत्ता इव पादपा ।
रथैश्चित्रैर्ध्वजैरश्वैः शरीरैर्हरिरक्षसाम् ।
रुधिरेण च सञ्छन्ना भूमिर्भयकरी तदा । [60]
हारकेयूरवस्त्रैश्च छत्रैश्च समलकृता ।
भूमिर्भाति रणे तत्र शारदीव यथा निशा ।
अङ्गदस्य च वेगेन तद्राक्षसबलं महत् ।
प्राकम्पत तदा तत्र पवनेनाम्बुदो यथा ।

Colophon

बलस्य च निघातेन अङ्गदस्य जयेन च । [65]
राक्षस क्रोधमाविष्टो वज्रदंष्ट्रो महाबल ।
स विस्फार्य धनुर्घोर शक्राशनिसमस्वनम् ।
वानराणामनीकानि प्राकिरच्छरवृष्टिभि ।
राक्षसाश्चापि मुख्यास्ते रथैश्च समवस्थिता ।
नानाप्रहरणा शरा प्रायुध्यन्त तदा रणे । [70]
वानराणा तु शूरास्ते सर्वे च प्लवगर्षभा ।

G1 2 चच, G3 अपि (for चापि) D6 नि स्वन —(l 41) D6 M1 2 शुश्रुवे D5 तु (for नु-) G3 घोरो (for घोरो) —(l 42) D6 -स्वनश्चैव, G1 स्वनिस्तत्र (for -स्वनस्तत्र) D7 सागरस्य च (for धनुषश्चापि) D6 7 Γ2 G1 2 घोषवत्, D9–11 T3 G3 M5 भैरवा, K (ed) नि स्वन (for निस्वन) —(l 44) G1 शब्दानि (for श°) D6 9 T1 M3 Cr m g सस्वज्य, Ct as above (for सत्यज्य) —(l 45) D9 तथैव, T2 बालैश्च (for चरणैश्च) —(l 46) G1 तु (for first च) D7 [आ]हता (for हता) D7 9–11 G3 M5 भग्न (for भिन्न-) D5 9 T1 G M5 तु (for second च) —(l. 47) G3 क्रोधित (for दुर्मदै) —(l 48) D7 9 I3 महाबाणै, D10 11 [s]ल त दृष्ट्वा, M1 2 नृशं दृष्ट्वा (for दृश बाण) D6 marg, M1 2 बाणैर, M5 रक्षो (for रणे) G1 रणे विध्वंस वानरान् (for the post half) —(l. 49) D6 I2 G1 चचार, M3 चचाल (for चचार) —(l 50) M1 2 [s]भ्यविद्रुतो (for अभ्यविद्रुतो) D5 प्रहरणो, D6 T2 3 °णै, G1 M5 °णै (for प्रहरणा) —(l 51) G3 निजघ्नुर्वानरास्तत्र (for the prior half) —(l 52) D9–11 जघ्ने तान्राक्षसान्रणे (for the prior half). —D9 om (haplography, see var) from the post. half up to the prior half of l 54 D10 11 वृक्ष, M1 2 हरीन् (for सर्वान्) D7 I3 transp वृक्षं and सर्वान् D10 वायु (for बालि-) D6 बली (for रणे) —(l. 53) G3 सावर्तक (for स°) T1 इवानिल —After l 53, M1 2 read l 56 —(l. 54) M1 2 तदाक्षसबलं सर्वं (for the prior half) G वृक्षान (for वृक्षम्). G1 2 M1 2 5 उद्यम्य (for उद्यम्य). D7 वेगवान् (for वीर्य°) —(l 55) M1 2 नाशयाशास (for क्रोधताम्राक्ष) —(l 56) M1 2 तेषां (for चान्). —(l 57) D7 9–11 Γ2 3 G1 -[अ]भिर्(Γ2 °)हतान् (for °नुचाइ) —(l 58) D5 M1 निर्हत्ता, D7 निर्हता (for निर्हता) G1 निर्भुग्न (for पादपा) —(l 59) D6 Γ2 G3 निर्, G1 निर्हा (for निर्हत) G1 गजैर् (for रथैर्). D6 वर्म (for चर्म) D5 T1 M3 transp चित्रैर् and अश्वै D9 रक्त-, G1 कपि- (for हरि-) —(l 60) D5 Γ1 रुधिरेणैव, D9–11 T3 °रावेण (for रुधिरेण च). D7 M3 (after corr *ent lin* as above) तथा (for तदा) G1 2 युद्धभूमिर्भयकरा (for the post half) ❀ Cm t भयङ्कर भयङ्करी। अभूदिति शेष। सुमनोभाव आर्ष।, so also Ck ❀ —(l 61) D5 7 T1 G3 M3 5 शक्रैश्, D11 छत्रैश्, Γ2 वज्रैश्, G2 चित्रैश् (for छत्रैश्). M5 तु (for च) G3 समवस्थिता (for समाकुला) —After l. 61, G3 reads l 70 —(l 62) G3 यथा (for रणे) M1 2 निशा तारागणैरिव (for the post. half) ❀ Cg शारदीव यथा निशेत्यत्र इवशब्दयोगाश्वद्वावेकार्थकौ। अपि चेतिवत्। इवशब्द पादपूरण इत्येके ❀ —(l 63) M1 2 तु (for च) —(l 64) M1 2 स्वस्त (for तत्र) G3 तथाम्बुद (by transp) ❀ Ck पवनेनाम्बुदो यथा। अनन्तर स्वबलस्य च घातेनेत्यादि। अत्र मध्ये सर्ग विच्छिद्यन्ति। नात्र वृत्तभेदप्रकरणभेदादिक तद्रूपमस्ति। Cm t cite Kataka. ❀

Colophon D11 om —*Sarga name* D9 वज्रदंष्ट्रयुद्ध. —*Sarga no* (figures, words or both) D5–7,10 T1 2 G M 53, D9 29, T3 54 —After colophon, G M1.2 5 conclude with श्रीरामाय नम.

—(l 65) Note hiatus between the two halves. T1 2 स्वबलस्य (for बलस्य च) D5 10 11 M1 2 Ck t स्वबलस्य च घातेन (for the prior half) D6 T2 3 G2 M1 2 5 जयेन, D7 9–11 बलेन (for जयेन) —(l 66) G1 3 क्रोधसविष्टो. —(l 67) D6 9–11 T3 G M5 विस्फार्य च, D7 स विस्फार्य च (hypm), T2 विनिष्फार्य (for स विस्फार्य) D7 9–11 T3 G1 -प्रभ (for स्वनम्) —(l 63) D6 7 11 G1 प्राकिरन् (for °रच) —(l 69) G2 [अ]भि- (for [अ]पि) M1 2 विक्रान्ता (for सुरयास्ते) T1 M1–3 रथेषु (for रथैश्च) T2 G1 2 M5 समुपस्थिता —(l. 70) D5 तथा रणे, G1 2 M5 महारणे, G3 ततो रणे, M1 2 रणाजिरे (for तदा रणे) —(l. 71) D7 9–11 T2 च (for तु). D5,7,9–11 Γ2 3 शूरास्तु, G1.3 M5 शूराणां,

अयुध्यन्त शिलाहस्ता समवेता समन्तत ।
तत्रायुधसहस्राणि तस्मिन्नायोधने भृशम् ।
राक्षसा कपिमुख्येषु पातयाचक्रिरे तदा ।
वानराश्चैव रक्ष सु गिरिवृक्षान्महाशिला । [75]
प्रवीरा पातयामासुर्मत्तवारणसन्निभा ।
शूराणा युध्यमानाना समरेष्वनिवर्तिनाम् ।
तद्राक्षसगणाना च सुयुद्ध समवर्तत ।
प्रभिन्नशिरस केचिच्छिन्नै पादैश्च बाहुभि ।
शस्त्रैरर्दितदेहास्तु रुधिरेण समुक्षिता । [80]
हरयो राक्षसाश्चैव शेरते गा समाश्रिता ।
कङ्कगृध्रबलाढ्याश्च गोमायुगणसकुला ।
कबन्धानि समुत्पेतुर्भीरूणा भीषणानि वै ।
भुजपाणिशिरश्छिन्नाश्छिन्नकायाश्च भूतले ।
वानरा राक्षसाश्चापि निपेतुस्तत्र वै रणे । [85]
ततो वानरसैन्येन हन्यमान निशाचरम् ।
प्राभज्यत बल सर्वं वज्रदष्ट्रस्य पश्यत ।
राक्षसान्भयविस्रस्तान्हन्यमानान्प्लवगमै ।
दृष्ट्वा स रोषताम्राक्षो वज्रदष्ट्र प्रतापवान् ।
प्रविवेश धनुष्पाणिस्त्रासयन्हरिवाहिनीम् । [90]
शरैर्विदारयामास कङ्कपत्रैरजिह्मगै ।
विभेद वानरास्तत्र सप्तष्टौ नव पञ्च च ।
विव्याध परमक्रुद्धो वज्रदष्ट्र प्रतापवान् ।
त्रस्ता सर्वे हरिगणा शरै सकृत्तदेहिन ।
अङ्गद सम्प्रधावन्ति प्रजापतिमिव प्रजा । [95]
ततो हरिगणान्भग्नान्दृष्ट्वा वालिसुतस्तदा ।
क्रोधेन वज्रदष्ट्र तमुदीक्षन्तमुदैक्षत ।
वज्रदष्टोऽङ्गदश्चोभौ सगर्तो हरिराक्षसा ।
चेरतु परमक्रुद्धौ हरिमत्तगजाविव ।
तत शतसहस्रेण वालिपुत्र महाबलम् । [100]
जघान मर्मदेशेषु शरैरग्निशिखोपमै ।

M3 शूरा ये (for शूरास्ते) D5 7 9–11 G1 2 M5 ते सर्व, D6 सर्वे तु, T2 3 M1 सर्वे ते (for सर्वे च) M1 2 वानराश्चापि बलिन सर्वे युद्धविशारदा —(1 75) T2 M3 [अ]पि (for [ए]व) D5 T1 M1–3 गिरीन्, D9 T2 3 G M5 महा- (for गिरि-) D6 T2 महाबला, G3 महोपलान् (for महाशिला). ❀ Ck गिरिवृक्षानिति षष्ठीसमास ❀ —(1 78) G1 बलाना, G2 M5 हरीणा (for -गणाना) D5 T1 M1 2 रक्षसा वानराणा च (for the prior half) G3 अभि- (for सम) ❀ Cg तद्राक्षसगणाना चेति । ते च राक्षसगणाश्च तद्राक्षसगणा । तेषाम् । तच्छब्देन वानरा उच्यन्ते ।, so also Ct ❀ —(1 79) D5 G1 प्रभग्न, D9–11 अभग्न, T3 विभिन्न- (for प्रभिन्न-) T3 छिन्ना, G1 2 भग्ने, G3 भिन्न- (for छिन्नै) G2 केशैश्च, Cm g as above (for पादैश्च) G3 M5 सहस्रश, Cm g as above (for च बाहुभि) —(1. 80) T3 शरैर् (for शस्त्रैर्) D5 6 T1 G1 3 M1 5 Cg अर्पित, M3 अर्चित- (for अर्दित-) G1 ते, M1 3 च (for तु) —(1 81) G1 M1 2 [अ]पि (for [ए]व) G3 शेरते वानरास्तत्र (for the prior half) D9 11 शरवेग, G3 M5 सर्मतो गा (for शेरते गा) M1 2 सा रणक्षिति (for गा समाश्रिता) —(1 82) D6 बलाकाढ्या, D7 T2 3 बलाकाश्च, D9 वराहाश्च, G1 बलाश्चैव, G2 बल्लाक्षाढ्या, G3 बलाश्चापि, M1 2 -बलाकीर्णा, M3 बलाराट्या (for बलाढ्याश्च) D5 7 9–11 T3 कुल- (for -गण) —(1 83) M1 2 कबधाश्च (for कबन्धानि) G1 2 M5 अभीक्ष्ण (for भीरूणा) —G1 damaged from वै up to शि in 1 84 D7 G2 M5 च (for वै) M1 2 भीरूणा तु भयावहा (for the post half) —(1 84) C2 M5 काय- (for -पाणि) M1 2 छिन्नबाहुशिर- पादि(M3 °दा) (for the prior half) D5–7 T1 2 G1 3 M1 2 5 भिन्न, G3 भग्न (for छिन्न) T2 तु (for च).—D9 om (haplʼ ?), D7 reads in marg 1 85 —(1 85) G3 राक्षसैश्च (for राक्षसाश्च) D7 10 11 भूतले (for वै रणे) M1 2 पेतु शतसहस्रश (for the post half) —(1 86) G2 3 M5 राजेन (for सैन्येन). M1 2 तु रक्षसा (for निशाचरम्). ❀ Cr निशाचर नैशाचरम् । वृद्धयभाव आर्षे । यद्वा निशि चरतीति निशाचरम् ।, so also Cm g t ❀ —(1 87) D5 6 T1 2 G2 पार्श्वत (for पश्यत) —After 1 88, D11 erroneously repeats निशाचर प्राभज्यत बल सर्व —(1 89) M1 2 [अ]भूद् (for स) —(1 90) M1 2 विवेश च (for प्रविवेश) G1 -यूथपान् (for -वाहिनीम्). —(1 92) M1 2 जघान (for विभेद) —D7 om 1 93 —(1 93) T2 G3 M1 2 5 महाबल (for प्रतापवान्) —(1 94) M1 2 शर (for शरै) G1 2 M5 उत्कृत्त- (for सकृत्त-) M1–3 रुधिरा (for देहिन) —(1 95) M1 2 समधावन्त, M5 प्रतिधावति, Cm g t as above (for सम्प्रधावन्ति) —(1 96) G3 भीतान् (for भग्नान्) M5 वायु (for वालि-) G3 M5 रणे, M1 2 बली (for तदा) —(1 97) D9 महतावि(ष्टो) (for वज्रदष्ट्र तम्) D9 वज्रदष्ट्रम्, T3 आपततम्, M1–3 उद्(M3 °द्री)क्षन्त् (for उदीक्षन्तम्) M5 उदेक्षत महाबल (for the post half).—For 1 94–97, D6 T2 subst

2* चेरु पेतुश्च मत्तुश्च वानरा शरपीडिता ।
वज्रदष्ट्रेण हरयो वातनुन्ना इव द्रुमा ।
ततो भग्नास्तु हरयो वज्रदष्ट्रभयार्दिता ।
वालिसूनु महात्मान त्रातारमभिपेदिरे ।
तान्सर्वानङ्गदो वीर समाश्वास्य महाबलीन् । [5]
वज्रदष्ट्रवधार्थाय मनश्चक्रे प्लवगम ।
उत्पाट्य वृक्ष सहसा वज्रदष्ट्रमभिद्रवत् ।
त तु विव्याध नाराच सप्तभिर्वाहिनन्दनम् ।
मर्मण्यभिजघानाशु वज्रदष्ट्र प्रतापवान् ।

[(1 1) D6 चेरु पेतुश्च मनुष्यश्च (hypm) (for the prior half) —(1. 2) T2 द्रुमा इव (by transp)]

—(1. 98) G3 जगद्गो वज्रदष्ट्रस्त्रा (for the prior half) D10 11 Ck t योयुध्येते परस्पर (for the post half) —(1 99) M1 2 युयुधाते तत क्रुद्धो (for the prior half) ❀ Cm k t हरिमत्तगजाविव । हरिरिह शार्दूल । Ck adds स्वमेऽपि सिंहदर्शने गजाना मरणात् । Cm t cite Kataka ❀ —(1 100) D5 7 T3 M1–3 शर- (for शत) M5 सहस्राणि

रुधिरोक्षितसर्वाङ्गो वालिसूनुर्महाबल ।
चिक्षेप वज्रदंष्ट्राय वृक्षं भीमपराक्रमः ।
दृष्ट्वा पतन्तं तं वृक्षममभ्रान्तश्च राक्षसः ।
चिच्छेद बहुधा सोऽपि मथितः पतितो भुवि । [105]
तं दृष्ट्वा वज्रदंष्ट्रस्य विक्रमं दुरतिक्रमम् ।
प्रगृह्य विपुलं शैलं चिक्षेप च ननाद च ।
समापतन्तं तं दृष्ट्वा रथादाप्लुत्य वीर्यवान् ।
गदापाणिरसम्भ्रान्तः पृथिव्यां समतिष्ठत ।
साङ्गदेन शिला क्षिप्ता गत्वा तु रणमूर्धनि । [110]
सचक्रकूबरं साश्वं प्रममाथ रथं तदा ।
ततोऽन्यं गिरिमाक्षिप्य विपुलं द्रुमभूषितम् ।
वज्रदंष्ट्रस्य शिरसि पातयामास वानरः ।
अभवच्छोणितोद्गारी वज्रदंष्ट्रः सुमूर्छितः ।
मुहूर्तमभवन्मूढो गदामालिङ्ग्य निश्वसन् । [115]
स लब्धसंज्ञो गदया वालिपुत्रमवस्थितम् ।
जघान परमक्रुद्धो वक्षोदेशे निशाचरः ।
गदां त्यक्त्वा ततस्तत्र मुष्टियुद्धमकुर्वत ।

अन्योऽन्यं जघ्नतुस्तत्र तावुभौ हरिराक्षसौ ।
रुधिरोद्गारिणौ तौ तु प्रहारैर्जर्जरीकृतौ । [120]
बभूवतुः सविक्रान्तावङ्गारकबुधाविव ।
ततः परमसंहृष्टो वज्रदंष्ट्रः कपिकुञ्जरः ।
उत्पाट्य वृक्षं स्थितवानासीत्पुष्पफलाचितम् ।
स जघ्राहोरसि चर्म वज्रं च विपुलं शुभम् ।
किङ्किणीजालसंछन्नं चर्मणा च परिष्कृतम् । [125]
विचित्रैरंशुमार्गैश्च्युतितैः कपिराक्षसौ ।
जघ्नतुश्च तदान्योन्यं निर्दयं जयकाङ्क्षिणौ ।
रणे सागरसंभेदे पुप्लुवाविव किंशुकौ ।
युध्यमानौ परिश्रान्तौ जानुभ्यामवनीं गतौ ।
निमेषान्तरमात्रेण वज्रदंष्ट्रः कपिकुञ्जरः । [130]
उदतिष्ठत दीप्ताक्षो दण्डाहत इवोरगः ।
निर्मलेन सुधौतेन खड्गेनास्य महच्छिरः ।
जघान वज्रदंष्ट्रस्य वालिसूनुर्महाबलः ।
रुधिरोक्षितगात्रस्य बभूव पतितं द्विधा ।
सरोषपरिवृत्ताक्षं शुभं व्यवहतं शिरः । [135]

(for °क्षेण) D० 7 9-11 हरि- (for वालि). D3 G1 2 M1-3 महाबल (for °बलम्).—(l. 101) D3 T1 M1-3 मा गमिव तोमरैः (for the post half) —(l 102) D० T3 -पुत्रो (for -सूनुर्).—(l 104) M1 3 निशाचरः (for च राक्षस).—(l 105) D० चिक्षेप (for चिच्छेद) G2 भूमौ (for सोऽपि) M1-3 निकृत्त (for मथित) D10 11 प्रापतद् (for पतितो).—(l. 107) G1 शिलां प्रगृह्य विपुलां (for the prior half) —(l 108) D० 9-11 M5 समापतत, M1 2 आपतत स (for समापतन्त) D9-11 दृष्ट्वा स (for तं दृष्ट्वा) G1 समापततीं तां दृष्ट्वा (for the prior half) T3 उत्प्लुत्य (for आप्लुत्य).—(l 110) D9-11 T3 अगदेन (for साङ्ग°) M3 गदा (for शिला). D5 T1 M1 2 सोंगदेन बलोत्क्षिप्तो (for the prior half). T3 रथ- (for रण-) —(l 111) G3 ततः (for तदा) —(l 112) G3 तदा (for ततो). D० आसाद्य, G3 आदाय (for आक्षिप्य) D7 9-11 T3 ततोन्यच्छिखरं गृह्य (for the prior half) T3 M5 विपुलं, G2 M1 2 विविध- (for विपुलं). G3 हरिसत्तमं.—(l. 113) M1 2 अगदो वज्रदंष्ट्रस्य (for the prior half) G2 रक्षसं, G3 वीर्यवान्, M1 2 मूर्धनि, M3 सोगदं (for वानरं) —After l. 113, D० ins.

3* शिलां बलवता क्षिप्तां छेदयामास तच्छिरः ।

—(l 114) D० T2 शोणितोद्गामी D० T2 3 G1 M3 सं मूर्छितं, G3 M5 महाबलं, M1 2 [s]मितास्तित (for सुमूर्छितं).—(l. 115) G1 इव समूढो (for अभवन्मूढो) D० निश्वसन्, M5 वीर्यवान् (for निश्वसन्) —(l. 116) T3 प्राप्त- (for लब्ध-).—M1 damaged for l. 117 —(l 117) M3 समरे (for परम) —(l 118) T3 तदा (for ततस्) T3 वीरो, M1 2 तेन (for तत्र) D5 6 T3 G1 M3 अपतत, M1 2 चकार ह (for अकुर्वत) —(l 119) D० 11 T2 3 निम्नतुस् (for जघ्नतुस्) —(l 120) M1 2 रुधिरोक्षितसर्वांगौ (for the prior half). G3 प्रहारैर्जर्जरीकृतौ (for the post. half).—(l. 122) Note hiatus between the two halves. T3 (to avoid hiatus) चानद., M1 (to avoid hiatus) खगद (for अङ्गद). D7.9-11 T3 द्रुमवरं (for कपिकुञ्जरः) M1.3 वालिपुत्रो हरीश्वरः (for the post. half) —(l 123) M2 3 बभु- (for आसीत्) D7 9-11 M1 -कुंशु, T3 G1.2 M5 फलान्वि(T3 °पु)त (for फलाचितम्).—After l. 123, G3 ins :

4* चिक्षेप परमक्रुद्धो वालिसूनुर्महाबलः ।
तं प्रचिच्छेद बाणौघैरिन्द्रदंष्ट्रः स राक्षसः ।

—(l. 124) D9-11 T3 G2.3 M5 जग्राह(M5 °हार) चर्मेति (for the prior half). M1.3 शितं (for शुभम्) ❀ Cr स जग्राहेति. स. वज्रदंष्ट्रः. ❀ —(l. 125) D1.7 -संछिन्नं (for -संछन्नं).—After l. 125, D7 G3 ins.:

5* वज्रदंष्ट्रोऽथ जग्राह सोऽङ्गदोऽप्यसिचर्मणी ।

—(l. 126) D9-11 T3 चित्रान्मा(T3 °तौ मा)र्गैश्च (for the prior half). D9-11 T3 चैरतुः (for रणितौ). G1 2 M1 2 हरि- (for कपि-). M5 कपिकुञ्जरराक्षसौ (for the post half) —(l 127) T2 3 निम्नतुश्च G3 तथा (for तदा) D9-11 G1 नर्दं(D9 °द)तौ, T1 3 G2 नर्दयो, M5 निर्भय (for निर्दय) —(l. 128) D० 7 9-11 T2 3 G M5 प्रगे. समूढौ. (D7 G3 °मभै, D9-11 T3 Ct °मुद्यै, M5 °मसै.) शोभितौ (for the prior half).—(l. 130) Note hiatus between the two halves. D7 9 10 निमिष-. M5 (to avoid hiatus) खगद (for अङ्गद) —(l. 132) D6.9 तु, M5 च (for सु-). D7 [अ]हरच् (for महच्).—(l. 133) D० पुत्रो (for सूनुर्). G2 महाहवे (for °बले) ❀ Cr अस्य शिरो जघानेत्यनेन वृक्षे प्रतिहते, अङ्गदोऽपि चर्मासी जग्राहेत्यवगम्यते ।, Cg अस्य वज्रदंष्ट्रस्येत्यन्वयः । के चित्तु स जग्राहार्षभं चर्मेति पठित्वा स वज्रदंष्ट्रः खड्गं जग्राह । अङ्गदो वृक्षं जग्राहेति व्याख्याय, खड्गेनास्य महच्छिर इत्यत्र वृक्षे प्रतिहतेऽङ्गदोऽपि चर्मासी जग्राहेत्यनेनावगम्यत इत्यपि

वज्रदष्ट्रं हतं दृष्ट्वा राक्षसा भयमोहिताः ।
त्रस्ता प्रत्यपतंल्लङ्का वध्यमाना प्लवंगमैः ।
विषण्णवदना दीना हिया किंचिदवाङ्मुखाः ।
निहत्य त वज्रधरप्रभाव
स वालिसूनु कपिसैन्यमध्ये । [140]
जगाम हर्षं महितो महाबल.
महस्रनेत्रप्रतिमैरिवावृत ।

Colophon

27

After Sarga 6 44, T2 3 ins

अकम्पने तु निहते हतशेषा निशाचरा ।
शशस् राक्षसेन्द्राय निहतोऽकम्पनस्त्विति ।
अकम्पन हत श्रुत्वा रावणो लोकरावण ।
सदिदेश महाकाय राक्षस भीमदर्शनम् ।
निष्क्रमस्व महाबाहो स्वसैन्यपरिवारितः । [5]
वानराणा वधार्थाय तथा राघवयोर्द्वयोः ।
एवमुक्तो महाकायो रावणेन महाबलः ।
प्रणम्य च दशग्रीव निष्पपात ततो द्रुतम् ।
अभिनिष्क्रम्य तद्वार बलाध्यक्ष ततोऽब्रवीत् ।
अद्य वानरसैन्यानि प्लावयिष्ये शरोर्मिभि । [10]
भर्तुर्वैरविमोक्षार्थं करिष्ये कर्म दुष्करम् ।
चतुश्चक्रसमायुक्त रथ साग्रामिक मम ।
मयूरध्वजमुच्छ्रित्य पताकामिरलकृतम् ।
सर्वशस्त्रसमायुक्त किङ्किणीजालशोभितम् ।
पिशाचवदनैश्चैव खरैर्युक्त महारथम् । [15]
सहस्रेण समग्रेण महापवनरहसा ।
सकल्प्य च रथं शीघ्रमानय त्व ममान्तिकम् ।
तथा च सर्वसैन्य मे नानाप्रहरणान्वितम् ।
भेरीशङ्खविमिश्रेण तूर्यनादेन नादितम् ।
द्वारेण दक्षिणेनैव निर्गच्छतु ममाज्ञया । [20]
महाकायवच श्रुत्वा बलाध्यक्षो महाबल ।
प्रणम्य च दशग्रीव निष्पपात ततो द्रुतम् ।
त्वरयामास लङ्काया महाकायस्य तद्बलम् ।
परिवार्य महाकाय चतुरङ्ग महाबलम् ।
परस्परकृतोत्साह प्रयान्त दक्षिणामुखम् । [25]
व्यूढ दृष्ट्वा महासैन्यमारुरोह महारथम् ।
महाकायो नदन्हृष्टः सनद्धकवचस्तदा ।
सैन्यै परिवृतोऽगच्छद्युद्धभूमि महाबल ।
निर्गच्छति महाकाये उत्पाताश्च सुदारुणा ।
अभवन्भयदा नृणा महाकायस्य पश्यत । [30]
अस्थिवर्षं पपाताथ समास शोणित बहु ।
सशर्करोऽनिलश्चासीत्सनिर्घातो महारव ।
सेनायाश्चापि मध्ये तु गोमायुश्चाप्यधावत ।
रथाच्छत्र पपाताथ समे च स्खलिता हया ।
रथे च न्यपतद्गृध्रो व्यनदन्नशिव शिवा । [35]
भूम्यामन्तर्गता भूत्वा प्रद्रवन्ति जगर्जिरे ।
मृगाश्च महिषाश्चैव ह्यपसव्य प्रचक्रिरे ।
स उत्पातान् गणयन्महाकायो युयुत्सया ।
स दक्षिणेन द्वारेण निर्ययौ रणकोविद ।
आलोक्य वानरानीक तद्राक्षसबल महत् । [40]
अभ्यधावत वेगेन रणे चाभिमुख तदा ।
वानराणामपि चमूर्दृष्ट्वा तद्राक्षस बलम् ।
आभिमुख्येन धावन्तं युद्धाय समुपस्थिता ।
जगृहु पर्वताग्राणि द्रुमाश्चाथ प्लवगमा ।
शिलाश्च विविधाकारा केचिच्च नखदंष्ट्रिण । [45]
तत प्रववृते युद्ध घोररूप भयावहम् ।
रक्षसा वानराणा च निघ्नतामितरेतरम् ।
नानारथवरौघश्च सादिनश्च सहस्रश ।
पदातिन पराक्रान्ता राक्षसा परिघायुधा ।
जघ्निरे वानरान्वीरान्नामानि च बभाषिरे । [50]
रज सध्याभ्रकपिल प्रच्छादयत भास्करम् ।
सछादिताभवद्भूमिस्तदा वानरराक्षसै ।
अश्मवृष्टिस्तदाकाशे शस्त्रवृष्टि पपात च ।
रेणुना शस्त्रवृष्ट्या च न किंचित्प्रत्यदृश्यत ।
अन्धकारे कृते तस्मिन्कश्मल महदाविशत् । [55]
रुरोध च रजस्तत्र कर्णनेत्राणि युध्यताम् ।
अन्योन्यं निगृहीता स्म कश्मलाभिहता भृशम् ।
एव युयुधिरे तत्र सज्ञाभिरितरेतरम् ।
केशाकेशि समालग्ना राक्षसा वानरास्तदा ।
रजसा पिहिते तस्मिन्भास्करे निष्प्रभे कृते । [60]
तत्र तत्रैव रजसा पतता धरणीतले ।

वर्णयन्ति ॐ —G2 om 1 135–136 —(1 135) D9–11 T2 तच्च तस्य(T3 रोष-) परीताक्ष (for the prior half). G3 हृत (for हत) —(1 137) D7 9–11 T2 3 M1 ह्यभ्यद्रवन्, G1 M2 5 ह्य(M2 चा)भ्यपतल् (for प्रत्यपतल्). G2 3 स(G3 सं)वस्ताभ्य(G3 °भ्यु)पनर्छका (for the prior half) —(1 138) D7 म्लाना (for दीना) —After 1 138, D6 ins

6* रावणाय वध प्रोचुर्वज्रदृष्टस्य राक्षसा ।

—(1 139) D3 6 10 वज्रधर D7 9–11 प्रतापवान्, G1 M5 -अभाव (for प्रभाव) G2 वज्रसमप्रभाव —(1 141) D6 T2 सहितो, G3 M5 गुप्तितो, Cm k t as above (for महितो). D6 T2 महाबले (for °ल).

Colophon —*Sarga name* D9 वज्रदृष्टवध —*Sarga no* (figures, words or both) D5 (erroncously) 53 , D6 7 10 11 T1 2 G M 54 , D9 30 , T3 55 —After colophon, G M1 2 5 conclude with श्रीरामाय नम

27

(1 16) T3 परम (for -पवन-) —(1 33) T3 मध्येन (for मध्ये तु) —(1 38) T3 अगणयन् (for न गणयन्). —(1 43) T3 समुपस्थित. —(1 44) T3 [अ]पि (for [अ]थ) —(1 48) T3 नागा रथवरौघाश्च (for the prior half) —(1 51) T3 कपिश (for -कपिल) —(1 53) T3 ह (for च). —(1 57) T3 च (for स) —(1. 61)

च्युतानामिव तालेभ्य फलाना श्रयते ध्वनि ।
शिरोभि पतितर्भाति रुधिरार्द्रैस्तदा मही ।
तपनीयनिभ. काले नलिनैरिव पुष्पितै ।
उपशाम्यत्यधो घोर रज परमदारुणम्। [65]
रुधिरौघेण महता प्लाविते धरणीतले।
ततो दृष्ट्वा सहस्राणि ऋक्षवानररक्षसाम्।
रुधिरार्द्राण्यदृश्यन्त गैरिकानिव ते तदा।
अन्तमन्य जवानान्यो दशन्तमपरोऽदशत्।
देहीत्यन्यो ददामीति तदान्योन्य बभाषिरे। [70]
तत्र तत्रैव शिरसा पतता धरणीतले'
ऊरुभिश्च समं तावद्विनिकृत्तमहाहवे।
बाहुभिर्विनिकृत्तैश्च हस्तापादैश्च सर्वत ।
कबन्धशतसकीर्णा भूर्बभूवोग्रदर्शना।
ऋक्षाणा वानराणा च राक्षसाना रणे सह। [75]
हयाना च रथाना च पतिताना महीतले।
राशय समदृश्यन्त गिरिमात्रा समन्तत ।
सज्ज्ञे रणभूम्या तु परलोका महानदी।
शोणितोदा महारौद्रा श्वापदरुपशोभिता।
कूलापहारिणी सा तु याम्या वतरणी यथा। [80]
मृताना स्तनमानानामृक्षवानररक्षसाम् ।
शरीराणि वहन्ती सा सशब्दा व्याकुला तदा।
मेदोमज्जाकर्दमा च भुजवृक्षाग्रशर्करा।
शराणा हर्षजननी भीरूणा भयवर्धनी ।
प्रावर्तत नदी घोरा युद्धे देवासुरोपमे। [85]
राक्षसा वानराश्चैव ता नदीमवगाहिरे ।
राक्षसैर्हन्यमान तु शरशक्त्यष्टितोमरै ।
परिघैर्भिण्डिपालैश्च शूलमुद्गरपट्टसै ।
विह्वल वानर सन्यमभज्यत दिशो दश ।
तच्च भग्न बल दृष्ट्वा वालिपुत्रोऽङ्गदोऽब्रवीत्। [90]
निवर्तध्वमधर्मज्ञा युध्यध्व किं स्थितेन च।
इह कीर्तिर्न हातव्या हत्वा शत्रून्रणाजिरे ।
रामकार्यं तु कर्तव्य सीताया परिमार्गणम् ।
यु यन्तु सहिता सर्वे न प्राणान्परिरक्षथ ।
एवमुक्त्वा तदा शूर शिखर गृह्य पाणिना। [95]
अङ्गदोऽभ्यद्रवत्क्रुद्धो राक्षसाना महाचमूम् ।
अङ्गदे सनिवृत्ते तु निवृत्ता सर्वयूथपा ।
पृथुश्च ऋषभश्चैव गवाक्ष पनसस्तदा ।
गजश्च गिरिकाशो वीर शतबलिस्तथा ।
तथान्ये वानरश्रेष्ठा युद्ध चक्रुः सुदारुणम्। [100]

अङ्गदस्तेन शूलेन राक्षसान्विनिपातयत् ।
तथान्यान्वृक्षवृष्ट्या तु शिलाभिश्च चापरान् ।
तलप्रहारैश्च तदा निजघानाथ राक्षसान् ।
हन्यमाना. पुनस्तेन वालिपुत्रेण धीमता ।
आयुधानि परित्यज्य प्रद्रुता भयपीडिता। [105]
केचिद्रुता प्रविष्टास्तु वानरैरर्दिता भृशम् ।
समुद्रं पतिता केचित्केचित्तत्रैव सस्थिरे ।
राक्षसान्विद्रुतान्दृष्ट्वा वज्रनाभो न्यवर्तत ।
रुधिराक्षी महावीर्य. कालदष्ट्रस्तथैव च ।
कालकल्पो विपाशश्च शतमायश्च राक्षस । [110]
वृत्रश्च दुर्धरश्चैव तथैव च महाशिरा ।
महानादश्च बलवास्तथान्ये रजनीचरा ।
निवृत्ता आगतास्तत्र यानराक्षसमूर्जनि ।
निजघ्नु शलभूयिष्ठ दिव्यैश्च परस्परम् ।
सिंहनादान्विनेदुश्च रणे वानरराक्षसा । [115]
तुमुलमा सर्वतस्तत्र चेष्टा
सग्राममायाय भय विमुञ्च ।
युद्ध समन्तात्तद राक्षसेन्द्र-
नानाविधैश्चुक्रुदीनसत्त्वा. ।

Colophon

निवृत्ताना निवृत्तैस्तै रक्षसा वानरै. सह । [120]
सभूयानुत युद्ध दारुण रोमहर्षणम् ।
राक्षस वज्रनाभ तु पृथुस्तु समयोधयत् ।
रुधिराक्ष गवाक्षस्तु योधयामास राक्षसम् ।
ऋषभ कालदष्ट्र तु महावीर्यमयोधयत् ।
पनस कालकल्प तु विपाश च गजस्तथा । [125]
तथा शतबलिर्वीर शतमाय निशाचरम् ।
वृत्रश्च दुर्धरश्चैव राक्षसौ सुमहाबलौ ।
क्रथनो मेघपुष्पश्च सकुद्धौ तावयुध्यताम् ।
महादष्ट्रश्च सकुद्धो महाकायश्च राक्षस ।
चक्रतु सुमहद्युद्ध शरशक्तिसमाकुलम् । [130]
वानराणा सहस्राणि जघ्नस्तुस्तो समन्तत ।
वानरैर्हन्यमानैस्तु अङ्गदस्तानभिद्रवत् ।
अयुध्यन्त तथान्ये राक्षसा वानरै. सह ।
ते तत्र भृशसतप्ता वध्यमाना. परस्परम् ।
व्याकुले ते बले ह्यास्तां वर्षासु सरिताविव । [135]
आविवेश तदा तीव्र राक्षसाना महद्भयम् ।
हरीणा तु तथाभूत महद्भयमजायत ।

T₃ शिरसा (for रसना). —(l. 67) T₃ तस्मिन् (for दृष्ट्वा) —(l 68) T₃ -[अ]क्तानि (for -[आ]र्द्राणि) and रुधितानीव नरैः (for the post half) —(l 70) T₃ ततो (for तदा). —(l 73) T₃ सर्वेश (for सर्वत) —(l 78) T₃ परलोक-. —(l. 81) T₃ समरे घोरे (for स्तनमानानाम्). —(l 91) T₃ च धर्मज्ञा (for अधर्मज्ञा) —(l 92) T₃ हतव्या (for हातव्या) —(l 93) T₃ परिमार्गण (for °मार्गणम्) —(l 96) T₃ महाचमू·. —(l 98) T₃ ऋषनस्तथा (for पनसस्तदा). —(l 101) T₃ राक्षस (for राक्षसान्) —(l 103) T₃ तथा (for तदा). —(l 110) T₃ [s]थ पार्श्वश्च (for विपाशश्च). —(l. 113) T₃ ह्यागतामर्षा —After the prior half, T₃ ins

1' सर्वे युद्धविशारदा ।
हन्तु व्याक्षिप्तास्तत्र

—(l 114) T₃ च (for ते) and परस्परे (for परस्परम्) Colophon —*Sarga no* T₂ 57, T₃ 58 —(l. 122) T₃ समयोजयत —(l 125) T₃ तु (for च) —Note hiatus between the two halves of l. 132. —(l. 134) T₃

Arya Research Team

वध्यमानेषु सैन्येषु नदत्सु सुमहत्सु च ।
कूजता स्तनता चैव शब्दश्चासीत्सुदारुण ।
रुधिरस्रावदिग्धाङ्गा पुष्पिता इव किंशुका । [140]
वानरा राक्षसाश्चैव गैरिका इव चाभवन् ।
कबन्धानि समुत्पेतुर्ऋक्षवानररक्षसाम् ।
उत्पत्य निपतन्ति स्म नृत्यन्ते चापराणि च ।
सग्रामे वर्तमाने तु यमराष्ट्रविवर्धने ।
वज्रनाभो धनुर्गृह्य पृथु सप्तभिरर्दयत् । [145]
शरैश्च तीक्ष्णधारैस्तु कर्मारपरिमार्जितै ।
पुन शरशतेनैन क्षिप्रहस्तो निशाचर ।
पृथुर्विद्ध शरैर्गाढैरुत्पाट्य शिखर गिरे ।
भ्रामयित्वा मुमोचाशु वज्रनाभस्य रक्षस. ।
मुक्त तु शिखर दृष्ट्वा सपतन्त तदाशुगै । [150]
शरैश्चिच्छेद सहसा तद्विकीर्ण पपात ह ।
पातिते गिरिशृङ्गे तु पृथुर्दृष्ट्वा महाबल ।
उत्पत्य पतता श्रेष्ठो रथस्य निपपात ह ।
अच्छिनत्स धनुस्तस्य बभञ्ज च महाबल ।
अश्वाञ्जघान तरसा स्यन्दन च बभञ्ज ह । [155]
रथे भग्ने तत क्षिप्र शूल जग्राह राक्षस ।
आजघानाथ शूलेन पृथु वानरपुगवम् ।
स तु शूलविभिन्नाङ्ग पृथुर्वानरपुगव ।
स जघान शिरोमध्य मुष्टिना त निशाचरम् ।
विह्वल तमुपालभ्य मुष्टिपातेन राक्षसम् । [160]
पादयो स तु जग्राह भ्रामयामास त पुन ।
भ्रामयित्वा तत पृथ्व्या वज्रनाभ निशाचरम् ।
निष्पिपेष पृथु पश्चात्पुनरप्याजघान ह ।
रुधिराशो गवाक्ष तु आकर्णविनियोजितै ।
शरैरशनिसकाशैर्बाह्वोरपि स चार्दयत् । [165]
स तु बाणविभिन्नाङ्गो गवाक्षो हरिसत्तम ।
शिलापादपवर्ष च मुमोच सुमहद्बली ।
तच्छिलापादप वर्ष निपात्य निशितै शरै ।
स शरैरशनिसकाशैर्गवाक्ष तु न्यपातयत् ।
गवाक्ष पतित दृष्ट्वा तारस्तु वनगोचर । [170]
अभ्यद्रवत वेगेन रुधिराश निशाचरम् ।
प्रगृह्य सालवृक्ष च भ्रामयामास सत्वर ।
मुमोच सुमहाकायो निशाचरवध प्रति ।
तमापतन्त सप्रेक्ष्य शरेणैकेन सोऽच्छिनत् ।
वानर दशभिर्विद्ध्वा सिंहनाद ननाद च । [175]
शरभूत तु त कृत्वा पातयित्वा च भूतले ।

रुधिराशो महावीर्यो व्यधमद्वानर बलम् ।
वानराणा समन्तात्तु शरै शतसहस्रश ।
आवर्त इव तोयाना गतो याति निशाचर ।
तस्य वानरसैन्यस्य अन्तकालस्तु सोऽभवत् । [180]
रुधिराशो दुराधर्षो राक्षस शरचापभृत् ।
पातितै पात्यमानैश्च गतसत्त्वैश्च मेदिनी ।
बभूव निखिला सर्वा पर्वतैरिव सतता ।
रुधिरौघसमाकीर्णा कबन्धशतसकुला ।
अनेकतनुवृत्ता तु दुर्गमार्गा वसुधरा । [185]
एतस्मिन्नन्तरे काले गवाक्षो वनगोचर ।
सज्ञा प्राप्य मुहूर्तेन तारश्च पुनरुत्थित ।
गवाक्षश्च महाकाय शिला गृह्य च सत्वर ।
भ्रामयित्वा मुमोचैना निशाचरवध प्रति ।
अनिवार्यशिला ता तु दृष्ट्वा राक्षसपुगव । [190]
उत्पपात रथाच्छीघ्र खड्गमादाय चर्म च ।
ससारथि सचक्र च सध्वज त सकूबरम् ।
रथ सचूर्णयामास सा शिला वानरेरिता ।
राक्षस खड्गपाणिं त समीक्ष्यायान्तमाहवे ।
गवाक्ष परिघ गृह्य तस्य चाभिमुख ययौ । [195]
यावत्तु खड्गमहरद्धरिणा क्षिप्रकारिणा ।
परिघेण हतस्तावत्पपात च ममार च ।
रुधिराश हत दृष्ट्वा कालदष्टो निशाचर ।
अभ्यद्रवच्च वेगेन ऋषभं वानरर्षभम् ।
ऐरावतकुले जातमारुह्य स गजोत्तमम् । [200]
छादयामास सक्रद्धो ऋषभश्चापि दन्तिनम् ।
स गज तूर्णमुत्पत्य ऋषभो वानरोत्तम ।
तलेनाशनिकल्पेन कुम्भमध्ये ह्यताडयत् ।
तलप्रहाराभिहतो नाद कृत्वाथ सगरात् ।
अपासर्पद्धनुर्मात्रं शीघ्र च प्रजहौ मदम् । [205]
राक्षस कालदष्ट तु वानरो ऋषभस्तदा ।
रुधिरेण तु दिग्धाङ्ग सधातुमिव पर्वतम् ।
अभिदुद्राव वेगेन पुनस्तत्र महागजम् ।
विषाण तस्य निष्कृष्य ताडयामास राक्षसम् ।
गजदन्तहत सोऽथ उत्तमाङ्गे निशाचर । [210]
पिण्डीकृत्य पपाताथ गतसत्त्वो महीतले ।
वानरेण हत सोऽपि स्वेन दन्तेन कुञ्जर ।
निपपात महीपृष्ठे वज्राहत इवाचल ।
हाहाकारमभूत्सर्वं तदा तद्राक्षस बलम् ।
कालदष्टे हते वीरे हृष्टा ह्यासन्वनौकस । [215]

परस्परै —(1 135) T₃ चले (for वले) —(1 139) T₃ स्तनतां (for स्तनता). —(1 146) T₃ कर्दूर- (for कर्मार-) —(1 150) T₃ तथा शरै (for तदाशुगै) —(1 151) T₃ शतधा (for सहसा) —T₃ om (hapl) from पुगवम् in l. 157 up to वानर in l 158 —(1 159) T₃ नि- (for स) and मध्ये (for मध्य) —(1 162) T₃ तु त (for तत) —(1 163) T₃ चासीत् (for पश्चात्) —Note hiatus between the two halves of l 164 —(1 168) T₃ निवार्य (for निपात्य) —(1 172) T₃ सत्वर —(l. 175) T₃ भिद्य (for विद्ध्वा) and ह (for च) —(1 176) T₃ शरघात (for °भूत) —(1 179) T₃ यतो (for गतो). —Note hiatus between the two halves of l 180 —(l. 184) T₃ -समाकीर्ण- —(1 185) T₃ -युक्ता (for -वृत्ता). —(l. 186) T₃ वीरो (for काले) —(1 188) T₃ तत्पर (for सत्वर.) —(l. 193) T₃ त (for स-) —(1 201) T₃ चोदयामास —(1 206) T₃ तथा (for तदा) —Note hiatus between the two halves of l 210 —(1 211) T₃ पिंडीकृत्वा —(1 213) T₃

कालदण्डं तत दृष्ट्वा कालरूपो निशाचर·।
पनस ताडयामास शरै पावकसन्निभै.।
शरै सपूरिततनू रथेऽस्य निपपात ह।
ममन्थ च रथ सर्वं हयाश्च निजघान स·।
मुष्टिना चाहनत्त तु कालरूपनिशाचरम्। [220]
मुष्टिप्रहाराभिहतो विह्वलो निपपात ह।
लाक्षारसनिभं तु मुखात्सुस्राव शोणितम्।
जीवितेन प्रमुक्तश्च निष्क्रान्तदशनेक्षण:।
त हत्वा राक्षसं तूर्णं पनसो मुदितोऽभवत्।
ननाद च महानाद मेघगम्भीरनिस्वन। [225]
वारयन्वानरी सेना विपाशोऽथ धनुर्धर:।
शरैरनेकसाहस्रै सूदयामास वानरान्।
सूद्यमान च त दृष्ट्वा वानरान्रणमूर्धनि।
गजस्तु गिरिसकाशो राक्षसान्समभिद्रवत्।
द्रुमवर्षं ववर्षाथ राक्षस प्रति वानर·। [230]
क्रोधेन महताविष्ट समूलविटपद्वयै।
ता आदयन्ती चाकाश वृक्षवृष्टि दुरासदाम्।
चिच्छेद निशितैर्बाणै शतशोऽथ सहस्रश·।
स वि य दशभिर्बाणैर्गज तु गजगामिनम्।
पुनश्च सप्तभिर्बाणै स्तनयोरन्तर महत्। [235]
आजघान च विंशत्या मुखे पञ्च शरै शितै·।
तत शरसहस्रेण विपाशो वानरोत्तमम्।
स तदा भिन्नमर्माङ्गो गजस्तु गजसन्निभ।
वैनतेय इव क्षिप्र तस्याङ्ग निपपात ह।
उत्पाट्यचत्तस्तस्य शिरो ज्वलितकुण्डलम्। [240]
विपाशस्य महावीर्यो गजस्तालफल यथा।
विपाश निहत दृष्ट्वा शतमायो निशाचर।
अभ्यद्रवत वेगेन गज प्रति गजो यथा।
गजस्तु परिव मुक्त राक्षस समभिद्रवत्।
वीर शतबलिश्चाथ ऋषभ. पनसस्तथा। [245]
अन्ये च वानरश्रेष्ठा शतमाय निशाचरम्।
वृक्षै शैलैर्महाकाया शिलाभि· शिखरैस्तदा।
शतमायश्च सक्रुद्ध शरवर्षं मुमोच ह।
शक्तितोमरवर्षेण शूलवर्षेण राक्षस।
ववर्ष चक्राणि गदाश्च मुसलानि च। [250]
परिघान्भिण्डिपालाश्च पाषाणानथ पर्वतान्।
शतमायेन चोत्सृष्ट वानराणामथोपरि।
मायाविहितमेतत्तु शस्त्रवर्षं पपात ह।
ते हता शस्त्रवर्षेण वानरा सर्व एव ते।
युयुधु समुदीर्णास्ते प्राणान्सुदुस्त्यजान्। [255]

विभज्यानरानदृष्ट्वा वालिपुत्रोऽङ्गदस्तदा।
अभिदुद्राव सहसा शतमाय महाबलम्।
वेष्टयित्वा तु ते सर्वे वानरै. पर्वतोपमै·।
सह सैन्येन सर्वेण युद्ध चक्रे सुदारुणम्।
रक्षा शाखामृगाश्चैव वृक्षसघाश्च चिक्षिपु। [260]
शरवर्षेण तान्सर्वान्राक्षस सप्रचिच्छिदे।
गवाक्ष शृङ्गमुत्पाट्य चिक्षेप तरसा बली।
ऋषभो द्रुमवृष्टिं च पनस. शिखर गिरे।
शिलाश्चैव गजस्तस्मिन्विससर्ज चमूमुखे।
रथचक्र शतबलि क्रथन: परिव तथा। [265]
तानापतत एवाशु सर्वेषा च भुजच्युतान्।
शररशनिसकाशैश्चिच्छेद स पृथक्पृथक्।
गवाक्षप्रहित तत्र विस्तीर्णं शृङ्गमुत्तमम्।
ऋषभेण द्रुमान्क्षिप्तानप्राप्तानन्तरेऽच्छिनत्।
गजेन च शिला मुक्ता रथचक्र च सायकै·। [270]
चिच्छेद शतमायस्तु पनसस्य गिरि तथा।
एव छित्त्वा शरैर्घोरैर्वानरान्प्रत्ययुध्यत।
तत्कृत्वा दारुण कर्म सिंहनाद ननाद च।
एतस्मिन्नन्तरे क्रुद्धौ राक्षसौ धूम्रदुर्धरौ।
शतमाय पुरस्कृत्य वानरास्तो निजघ्नतु:। [275]
क्रथनो वानरश्रेष्ठो जीवित त्यज्य दूरत.।
अभिदुद्राव वेगेन दुर्धर राक्षस रणे।
प्राहरच्च तलेनैव गिरिशृङ्गोपम शिर।
पपात च हत· सख्ये दुर्धरस्त्यक्तजीवित·।
त दृष्ट्वा युद्धशौण्डेन सखा तस्यैव रक्षस·। [280]
शिलया मघवतुल्येन धूम्र प्राणैर्वियोजित।
धूम्र च दुर्धर चैव प्रेक्ष्य सख्ये निपातितौ।
शतमायो रणे क्रुद्धो वानरान्समयोधयत्।
एकमेकेन बाणेन त्रिभिस्त्रीन्दशभिर्दश।
एकेन च शत वीरो वानराणा जघान ह। [285]
अङ्गद पञ्चविंशत्या गवाक्ष नवभि शरै·।
पृथु च दशभिर्बाणैर्ऋषभ सप्तभिस्तदा।
पनस चैकविंशत्या गज पञ्चभि शिलासुखै:।
शरेण गृध्रपत्रेण वीर शतबलिं तदा।
अन्याश्च वानरगणाञ्शतशोऽथ सहस्रश·। [290]
व्यधमत्सायकैस्तीक्ष्णै राक्षसो धन्विना वर.।
ततस्तद्वानरबल शररामीत्सुदुर्लभम्।
पलायत दिश सर्वा वर्जयित्वा तु यूथपान्।
प्रनष्टान्वानरान्दृष्ट्वा अङ्गदप्रमुखास्तदा।
राक्षसस्य च तद्वीर्यं निराशा जीवितेऽभवन्। [295]

स (for त·) —(l. 219) T३ तदानर (for तद्राक्षसं). —(l. 220) T३ गाहरत तु सन्नदा —(l. 231) T३ पिट-पट्टै —(l. 236) T३ भुजै पनसस्तथा (for the post. half). —(l. 237) T३ शत· (for शर). —(l. 240) T३ तथ (for तस्य). —(l. 247) T३ तथा (for तदा). —(l. 248) T३ तु (for त) —(l. 251) T३ अपि (for अथ) —(l. 253) T३ निशितै (for निशितम्) —(l. 257) T३ निशाचर (for महाबलम्) —(l. 264) T३ गिरेस् (for गजस्) —(l. 265) T३ प्रथन (for क्रथन) and तदा (for तथा). —T३ om (haplᵍ) l. 266-271 —(l. 272) T३ प्रत्यविध्यत (for प्रत्ययुध्यत) —(l. 276) T३ वानरान् (for जीवित) —(l. 279) T३ आपपात (for पपात च). —(l. 284) T३ त्रि (for त्रीन्). —(l. 287) T३ नवभिर् (for दशभिर्). —(l. 288) T३ [ए]त (for [ए]क-) —(l. 289) T३ पर (for शिर) and तथा (for तदा). —(l. 292) T३ सुदुर्लभ (for सुदुर्लभम्). —(l. 294)

जयो वास्तु वधो वेति बुद्धिं कृत्वा प्लवगमाः ।
शिखराणि प्रगृह्याशु शतमाय प्रचिक्षिपुः ।
तानि तैः सप्रयुक्तानि अन्तरिक्षे शितैः शरैः ।
शिखराणि द्रुतं छित्त्वा शङ्खशब्दमथाकरोत् ।
सहस्रेण पृषत्कानां सहस्रमहनत्कपीन् । [300]
एकैकेन तु बाणेन यूथपान्समताडयत् ।
ततस्ते यूथपश्रेष्ठा भिद्यमानाः शिलीमुखैः ।
आकर्णपूरितैर्मुक्तैः राक्षसेन पुनः पुनः ।
आकाशं सहसोत्पत्य सर्वे ऽपतंस्तदा ।
रथे तस्य महाकायाः यूथपा गिरिसन्निभाः । [305]
जघान स हयांस्तस्य गवाक्षोऽथ ध्वजं गजः ।
पतन्तश्च रथं तस्य विध्वंसयत वानराः ।
ऋषभः सारथिं तस्य आयुधानि पृथुस्तथा ।
वीरः शतबलिश्चैनं मुष्टिनाभिजघान ह ।
शतमायस्ततः क्रुद्धः खड्गमादाय चर्म च । [310]
गरुत्मानिव वेगेन उत्पपात विहायसा ।
असिं शतबलिश्चापि प्रगृह्य प्रसभं बली ।
आकाशं शस्त्रप्रकाशमुत्पपात हरीश्वरः ।
तावुभावम्बरे वीरौ तदा वानरराक्षसौ ।
खड्गपाणी सुसंक्रुद्धावन्योन्यमभिजघ्नतुः । [315]
खड्गेनाप्रहरद्रक्षो वानरेन्द्रस्य वक्षसि ।
चर्मणा वञ्चयामास पतन्तमसिमुत्तमम् ।
वञ्चयित्वा प्रहारं तु वीरः शतबलिः पुनः ।
ऊरुमुद्दिश्य खड्गं तु ऊरुभ्यां प्राहिणोत्तदा ।
छिन्नोरुरथशीर्षो वै वेष्टमानो यथोरगः । [320]
निपपात हतः सोऽथ गरुडेनेव पन्नगः ।
दृष्ट्वा तु शतमायं च गतासुं पतितं क्षितौ ।
प्रहृष्टा वानराः सर्वे विनेदुर्जलदा इव ।

Colophon

सचिवान्निहतं दृष्ट्वा शतमायं च राक्षसम् ।
निःशेषं च बलं सर्वं कृतं दृष्ट्वा प्लवंगमैः । [325]
रोषसंरम्भताम्राक्षो भ्रात्रा सह कनीयसा ।
वानरानभिदुद्राव महाकायो महाबलः ।
धनुः शक्रधनुःप्रख्यं सज्यं वेगेन वै कृतम् ।
आदाय सहसा वीरो जगामाभिमुखः परान् ।
रथमास्थाय शक्रारिर्दंशितः शस्त्रपाणिभिः । [330]
छत्रेण ध्रियमाणेन मयूरेण ध्वजेन च ।
कवचेन विचित्रेण वीज्यमानश्च चामरैः ।
लक्ष्म्या परमया युक्तः सारथिं वाक्यमब्रवीत् ।
चोदयाश्वानसंभ्रान्तः समेषु विषमेषु च ।
वानरान्हन्तुमिच्छामि यैर्हृतं राक्षसं बलम् । [335]
एतान्हत्वा ह्यहं सङ्ख्ये ततो रामं सलक्ष्मणम् ।
सुग्रीवं च हनिष्यामि हनूमन्तं च वानरम् ।
अप्रमत्तो भवाश्वेषु सारथे वारणे तथा ।
मम त्वं युध्यमानस्य रथे तिष्ठस्व वीनभी ।
प्रतिज्ञाय तु तद्वाक्यं सारथिस्तस्य रक्षसः । [340]
सहस्रं वाजिनां क्षिप्रं चोदयामास संयुगे ।
ततस्ते वानराः सर्वे शैलवृक्षशिलायुधाः ।
अभिसंगम्य वेगेन महाकायं प्रदुद्रुवुः ।
राक्षसोऽथ महाकायः शरैस्तान्व्यमोहयत् ।
चिच्छेद पर्वताग्राणि शिलावृक्षगतानि च । [345]
ततस्तु शरवर्षेण प्रच्छाद्य हरिवाहिनीम् ।
आकाशं छादयामास शरवृष्ट्या निशाचरः ।
दिशः प्रच्छादिताः सर्वास्तमोभूता इवाभवन् ।
अन्धकारीकृतं सर्वं न प्रज्ञायत किंचन ।
धनुषो निष्पतन्तश्च शरा वर्हिणवाससः । [350]
रक्ता पीता सिता श्वेता शलभाना प्रजा इव ।
आलात इव चाविद्धं धनुस्तस्य प्रजायते ।
विद्युद्भिरावृतं यद्वद्द्वितीयेन्द्रधनुर्दिवि ।
सघर्षजश्च बाणानां शब्द आसीत्सुदारुणः ।
दह्यतामिव वेणूनामभवद्दारुणो महान् । [355]
पर्वतैः पतितैश्चैव तरुभिश्चैव चूर्णितैः ।
वानराणां शिरोभिश्च शरीरैश्चैव सर्वतः ।
हस्तपादसमाकीर्णा ऋक्षवानरसंकुला ।
क्षयेणागम्यरूपा सा सर्वभौ युद्धमेदिनी ।
ततस्ते वानराः सर्वे बाणसंघातपीडिताः । [360]
न शेकुश्चेष्टितुं यत्र शकुना इव पञ्जरम् ।
हन्यमानाः शरौघैस्तैर्निष्पन्दास्तु तताः स्थिताः ।
निरुच्छ्वासाः कृताः सर्वे शिलावृष्ट्या यथा द्विजाः ।
न तेषामङ्गुलमपि विवृतं समदृश्यत ।
निरन्तरीकृता बाणैः कदम्बा इव केसरैः । [365]
अशोकस्तबकाकारा रुधिरेण समुक्षिताः ।
निश्चेष्टाश्च कृताः सर्वे दाडिमप्रतिमैर्मुखैः ।
निश्चेष्टान्गतसत्त्वांश्च दृष्ट्वा सर्वान्प्लवंगमान् ।
अङ्गदो वानरश्रेष्ठो वानरान्वाक्यमब्रवीत् ।
न भेतव्यं न भेतव्यमेतस्य युधि रक्षसः । [370]
अहमेनं वधिष्यामि सत्यमेतद्ब्रवीमि वः ।
भवन्तः कृतकर्माणस्तिष्ठध्वं वानरोत्तमाः ।

Note hiatus between the two halves T₃ तथा (for तदा) —Note hiatus between the two halves of 1 298 —(1 304) T₃ तथा (for तदा) —(1 306) T₃ [आ]सौ (for स) —(1 307) T₃ स (for च) —(1 308) Note hiatus between the two halves T₃ तदा (for तथा) —Note hiatus between the two halves of 1 311 —(1 316) T₃ प्रहरद् (for [अ]प्रहरद्) —Note hiatus between the two halves of 1 319 —(1 320) T₃ भिन्नोरुरद- —(1 321) T₃ [S]पि (for sa) Colophon — *Sarga no* T₂ 58, T₃ 59 —(1 331) T₃ छिद्रेण (for छत्रेण) —(1 332) T₃ च चित्रेण (for विचित्रेण) —(1 338) T₃ रथाश्वेषु (for भवाश्वेषु) and वानरे (for वारणे) —(1 339) T₃ रणे (for रथे) —T₃ om 1 349-355 —(1 358) T₃ -समाकीर्ण- —(1 359) T₂ lacuna for रुधा सा. —(1 360) T₃ संधिता (for -पीडिता) —(1 361) T₃ कुजरे (for पञ्जरम्) —(1 362) T₃ तत (for स्थिता).

नागोऽवशिष्ट एकोऽद्य मम रक्षो महाबल ।
वानरानेवमुक्त्वा तु विधुन्वंश्चापु तान्शरान् ।
अभ्यधावत वेगेन प्रगृह्य महतीं शिलाम् । [375]
राक्षसाय समोचाथ ता शिला योजनायताम् ।
आपतन्तीं शिलां दृष्ट्वा पातयामास पत्रिभिः ।
त्रिभिः शरशतैरन्तो वानरः पञ्चभिर्भुजे ।
शिरस्येकेन बाणेन उरस्येकेन कर्णिना । [380]
निर्बिभेद च गात्रेषु स भृशं राक्षसर्षभः ।
स तदा भिन्नमर्माणो बालिपुत्रः प्रतापवान् ।
पाणिना मुखमामृज्य शोणिताक्तमथाक्षिणी ।
वृक्षानुत्पाट्य तरसा द्रुमवृष्टिं ववर्ष ह ।
मुक्तामुक्तान्ततस्तांस्तान्शरैश्चिच्छेद राक्षसः । [385]
छित्त्वा तु तान्ततो वृक्षान्क्रुद्ध प्रत्यविध्यत ।
शराणां च सहस्रेण धनुर्मुक्तेन सयुगे ।
महानादैर्विभिन्नाणः परिष्वन्भ्रातर रणे ।
अङ्गदस्तु तत क्रुद्धस्ततोऽपि महतीं शिलाम् ।
भ्रामयित्वा मुमोचाशु महानादरथं प्रति । [390]
आपतन्तीं शिलां दृष्ट्वा गदां तस्मै मुमोच ह ।
गदया भग्नमाहत्य निपपात शिला भुवि ।
ततो रोषसमाविष्टो रथेऽस्य निपपात ह ।
अङ्गदो धनुराच्छिद्य बभञ्ज च महाबल ।
भङ्क्त्वा तस्य धनुर्दिव्यं केशान्गृह्य राक्षसम् । [395]
क्षिप्त्वाविध्य वेगेन क्षिप्र प्राणैर्व्ययोजयत् ।
भ्रातर निहत दृष्ट्वा महाकायो महाबल ।
अङ्गद ताडयामास बालिपुत्र स्तनान्तरे ।
स तु तेन प्रहारेण मूर्छितो भ्रान्तचेतन ।
पपात सहसा भूमौ विसञ्ज्ञो वेदनार्दितः । [400]
अङ्गद पतित दृष्ट्वा वानराः सर्व एव ते ।
शिलापादपवर्षेण राक्षस समवाकिरन् ।
छाद्यमानमानस्तस्तु महाकायो निशाचर ।
अविध्यत ततो बाणैर्वानरास्त्वरयान्वित ।
गवाक्ष दशभिर्बाण पृथु पञ्चभिरायसैः । [405]
गज शरशतेनैव तथा शतबलिं त्रिभिः ।
अर्दयित्वा ततश्चाण पनस सप्तभिः शरैः ।
सप्तभिः कुमुदं चैव मैन्दपुष्प शतेन च ।
एव स यूथपान्वीरो विप्रद्रुतो निशाचर ।
पुनरेव तु तान्सर्वान्प्रत्यविध्य प्लवगमान् । [410]
ततोऽभिमन्तरे वीर प्राप्य सज्ञा हरीश्वर ।
अङ्गद पाणिना नेत्रे प्रमृज्य रुधिरोक्षिते ।
आयसीं तु गदा गृह्य हयास्तस्याहनद्बली ।
सहस्र वाजिना तस्य सारथि च व्यपातयत् ।
गदया चाहनत्तं तु राक्षस मूर्ध्नि सत्वरम् । [415]
स तु त रथमुत्सृज्य हताश्व हतसारथिम् ।
महाकायो गदा गृह्य बालिपुत्रमभिद्रवत् ।
ततस्तौ तु गदाहस्तावुभौ वानरराक्षसौ ।
आजघ्नतुस्तदान्योन्य वीक्षतमनुव्रतौ ।
राक्षसस्ताडयामास मूर्ध्नि वानरपुगवम् । [420]
प्रास्फोटच्च तदा मूर्ध्नि प्रसुस्राव च शोणितम् ।
अङ्गदश्चापि त रोषाद्राक्षसस्याथि चाङ्गदम् ।
शातयामौ ततस्तौ तु सम च समवापतुः ।
ततस्तौ जर्जरीभूतौ पुष्पिताविव किंशुकौ ।
दन्ताभ्यामिव मातगौ गदाभ्या युध्यतो भृशम् । [425]
ते गदे शकलीभूते समुत्सृज्य प्रचक्रतुः ।
बाहुयुद्ध महाघोर बलिशक्रौ यथा पुरा ।
तयो पादाभिघाताच्च भस्मीभूत रजोद्धतम् ।
प्रच्छादयन्तौ तं देश दृश्येता तेन तेजसा ।
तौ भुजै समसृज्येतामायसै परिघैरिव । [430]
अनुप्रहारै पतितै शिरोभ्या पादघट्टनैः ।
पादप्रहारैः करजैः पादक्रीलै पुन पुनः ।
हाहाकारमकुर्वन्त वानराः पार्श्वतः स्थिताः ।
बालिपुत्र महावीर्यं बालितुल्यपराक्रम ।
जयस्व शत्रु दुर्धर्षं पिता ते दुन्दुभिं यथा । [435]
एव सस्तूयमानस्तु बलेनापूर्यता गतः ।
तलेनाशनिकल्पेन राक्षस समताडयत् ।
पुनश्चन समुत्क्षिप्य पातयामास भूतले ।
तस्योपरि समारुह्य पशुमारममारयत् ।
हते तस्मिन्महाकाये सिंहनादो महानभूत् । [440]
वानराणां प्रहृष्टाना साधु साधिति वादिनाम् ।
हतशेषास्तु ये तत्र राक्षसा विप्रदुद्रुवुः ।
लङ्का प्रविविशुस्तूर्णं भयार्ता वानरार्दिता ।
वानरा सगतास्ते तु रामपार्श्वं समागमन् ।
शशसुश्च तदा सर्वे महाकाय निपातितम् । [445]
सग्राम च महद्वृत्तमङ्गद च परं सह ।
तच्छ्रुत्वा राघव प्रीतो बालिपुत्र परिष्वजत् ।
सुग्रीवो वानराश्चान्ये हनूमॉल्लक्ष्मणस्तथा ।
विभीषणश्च सहृष्टो राघव वाक्यमब्रवीत् ।
महाकाये हते राम रावणो निहतो ध्रुवम् । [450]
अङ्गदेन कृत कर्म महद्राम न सशय ।

—(l 365) Ta निरस्त हता —(l 371) Ta हनिष्यामि (for वधिष्यामि) —Note hiatus between the two halves of l 370 —(l 383) Ta रोषितात्मा —(l 385) Ta मर्मान्मुक्तास् (for मुक्तान्मुक्तास्) —(l. 387) Ta [अ]पि (for तु) and द्रुमवृष्टिं (for वृक्षवर्षं). —(l 388) Ta परीयन् (for परिष्वन्) —(l 395) Ta केशे (for केशान्). —(l 396) Ta निष्पात (for निपपात). —(l. 406) Ta शत- (for शर-). —(l 409) Ta विध्य (for विद्धा). —(l. 412) Ta प्रगृह्य (for प्रगृह्य). —(l 414) Ta व्यपोथयत् (for व्यपातयत्). —(l 415) Ta [अ]हरत् (for [अ]हनत्). —(l 418) Ta राक्षसमानर्च (by transp) —(l. 423) Ta समापतुः (for समापतु) —(l 425) Ta युध्यता** (moth-eaten). —(l 429) Ta दृश्यतां स्वेन (for दृश्येता तेन). —(l. 430) Ta भर सज्येताम् —(l. 437) Ta तमताडयत्. —(l. 441)

सहर्षेण तत्र जगाम राम
श्रुत्वा महाकायवध महात्मा ।
तथा महाकायवध महोग्र
ततोऽब्रद प्रीतमना ददर्श । [455]

Colophon

रुधिरस्रावदिग्धाङ्गा राक्षसास्ते रणाजिरात् ।
प्रविश्य लङ्का वेगेन रावणाय शशसिरे ।
महाकाय हत श्रुत्वा शतमाय च राक्षसम् ।
तथान्याञ्जिहताञ्श्रुत्वा महादेन्यमुपागत् ।
शोकाविष्टश्चिर ध्यात्वा दिश समवलोक्य च । [460]
नेदमस्तीति सचिन्त्य अधोदृष्टिर्बभूव ह ।

28

After 911*, Ñ V(V2 missing up to l. 149, cf vl 6 45 1) B2-4 D4 13 ins

युद्धादन्यतम चैव न युक्त समवैक्षत ।
वज्रदष्ट्र ततो वीर व्यादिदेश महाबल ।
शीघ्र निर्याहि सहितो राक्षसै सुमहाबलै ।
हयै रथैस्तथा नागैर्बहुभिस्त्वभिसवृत ।
हत्वा राम सह भ्रात्रा सुग्रीव च हरीश्वरम् । [5]
निवर्तस्व रणे वीर न हि तेऽस्ति समो युधि ।
क्रुद्धस्य युध्यमानस्य घोरान्विसृजत शरान् ।
प्रमुखे नोत्सहेत्स्थातु वज्रपाणिरपि स्वयम् ।
असकृत्त्वत्सहायेन मया देवा पराजिता ।
यमश्च निर्जित सख्ये सर्वेष्वाविपुरस्कृत । [10]
वज्रदष्ट्रस्ततो वेगमुक्तो राक्षसेन्द्रेण वीर्यवान् ।
कृत्वा प्रणाम सहृष्ट प्रत्युवाच दशाननम् ।
एष निर्यामि शत्रुघ्न तव शत्रुवधाय वै ।
सुखी त्व भुङ्क्ष्व लोकाञ्छ्रीन्सीता च निहतेश्वराम् ।
अद्य तौ नाशयिष्यामि मिथ्याप्रव्रजितौ रणे । [15]
शिवेन ध्याय मा राजन्नेष हन्मि रिपु तव ।
ततस्तस्य बलाध्यक्ष समानीय महद्बलम् ।
सूतश्चाश्वरथ सज्ज तस्य शीघ्रमुपानयत् ।
आरुरोह ततो दिव्य रथ हेमविभूषितम् ।
नानाप्रहरणाकीर्ण सचन्द्रमिव पर्वतम् । [20]
वानरै सह सग्रामे युद्धकामस्य वीमत ।
वज्रदष्ट्रस्य वीरस्य शान्ति चक्रुर्निशाचरा ।
अथर्वाण समुद्दिश्य मन्त्रमस्तवचोदिता ।
रणप्रवेशसदृशीं कृत्वा वैजयिकी क्रियाम् ।
तत सर्वास्त्रविद्वास समरेष्वनिवर्तिन । [25]
विद्याव्रतसमायुक्ता कृतन्वस्त्ययनक्रिया ।
धनुर्हस्ता कवचिनो वेगेनाप्लुत्य राक्षसा ।
बान्धवान्सपरिष्वज्य निषेतु सयुगक्षमा ।
तद्बल प्रेक्ष्य निर्गच्छन्राक्षणाज्ञाप्रचोदितम् ।
आस्थित परम दिव्य रथ पररथारुजम् । [30]
महायुधधर श्रीमाञ्शुभवर्मधर प्रभु ।
शिरस्त्राणतनुत्राणी धन्वी परमदुर्जय ।
स नील इव शैलेन्द्रो वर्मित समभासत ।

T3 उपागमन् (for समागमन्) —(1 446) T3 जगदस्थ (for अब्रद च) —(1 452) T3 प्रहर्षेण चात्र Colophon — *Sarga no* T2 59, T3 60 —(1 457) T3 [आ]शशसिरे —Note hiatus between the two halves of 1 461

28

(1 1) D13 निवर्तितु (for अन्यतम) D4 नैव (for चैव) Ñ1 V1 3 B2-4 समवेक्षत D4 युक्तरूपमवेक्षत (for the post half) —(1 2) Ñ2 B2 महावीर्य(B2 °रम्) (for ततो वीर) B2 आदिदेश Ñ2 B2 स रावण , B4 D13 महाबल (for °बल.) —(1 3) D4 त्व च (for शीघ्र) B3 तत्सैन्य (for सहितो) —(1 4) V1 D4 [अ]ग, V3 [अ]नु- (for [अ]भि-). —(1 5) D13 स- (for च) Ñ2 B2 महावीर्य (for हरीश्वरम्) —(1 6) D13 सहैभिर्वानरैस्तथा (for the post half) —(1 7) B4 वध्यमानस्य (for युध्य°) Ñ2 ससृजन —(1 8) D4 प्रमुख D13 इव (for अपि) —(1 9) D13 अजेयास् (for असकृत्) —V3 om 1 10-11 —(1 10) D4 13 -पुर मर (for -पुरस्कृत) —(1 11) Ñ2 D4 च (for तु) —(1 12) D4 कृतप्रणाम (for कृत्वा प्रणाम) —(1 14) V3 सुभद्र (for सुखी त्व) D4 सुख त्व भुङ्क्ष्व लङ्का च सर्वराक्षसमेविता —(1 15) B2 4 निहनिष्यामि, D13 मारयिष्यानि (for नाशयिष्यामि) V3 प्रव्राजितो Ñ1 V1 3 B4 वने (for रणे) —B4 om 1 16 —(1 16) Ñ1 ध्यायसे, V1 ध्यादि मा D4 स्वामिन् (for राजन्) D13 शिव ते ध्यायमानोह (for the prior half) V1 3 अथ हन्मि, D4 यत्नेन हन्मि (hypm), D13 हनिष्यामि (for एष हन्मि) Ñ2 रिपूस्. —(1 17) B3 महत्सैन्य (for बलाध्यक्ष) D4 बलाद् (for महद्). —(1 18) V3 व्यूह्य (for सूतश्) Ñ1 साश्व, V1 चाथ; V3 B3 माश्व-, B2 चास्य (for चाश्व-) V1 दिव्य सज्ज (for सज्ज and तस्य) B1 om शीघ्रम् —(1 19) D4 रथ (for ततो) —(1 20) V1 3 तोयद् (for पर्वतम्) —(1 21) B4 D13 युध्यमानस्य (for युद्धकामस्य) —(1 22) B3 प्रयाणे तस्य (for वज्रदष्ट्रस्य) —(1 23) D4 13 अथ वा त (for अथर्वाणं). B3 समुद्दीक्ष्य D13 सभव- (for -सस्तव) B4 D13 -चोदिता. D4 मन्त्रमश्रवनोदिता (for the post half) —(1 24) V3 B2 3 वन (for रण-) D13 -प्रदेश- (for -प्रवेश-) D4 रणे प्रचेत सदृशीं (for the prior half) B2 ते वैदिकी, D13 वैजयिकां (for वैजयिकीं) D4 क्रमात् (for क्रियाम्) —(1 25) D4 विद्वीर (for विद्वास) D13 [अ]भिवर्तिन (for [अ]निवर्तिन). —(1 26) Ñ2 B2 दिव्य- (for विद्या-) —(1 27) D4 वेगम् (for वेगेन) B4 D13 [आ]क्रम्य, D4 [उ]त्पत्य (for [आ]प्लुत्य). —(1 28) Ñ2 अन्योन्य (for बान्धवान्) Ñ1 V1 3 सपरित्यज्य. Ñ2 सयुगक्रिया , V1 B2 4 °प्रिया , V3 समरेच्छया, D13 सगरक्रियां (for सयुगक्षमा) —(1 29) B4 निर्यात (for निर्गच्छन्). Ñ2 B2 D4 -प्रचो(D4 °णो)दित , B3 D13 -प्रदेशित (for -प्रचोदितम्) —(1 30) Ñ1 V1 परमदारुण (for पररथारुजम्). —(1 31) B2 -रथ (for first -धर) Ñ1 V1 शुभचर्म-, B2 3 शुभकर्म- (for °वर्म) —(1 33) B2 3 वर्धित , B4 सत्कृतः

सिंहशार्दूलदर्पाश्च हयास्ते किङ्किणीचिताः ।
तस्य राक्षसवीरस्य चकुरग्रे रथोत्तमम् । [35]
कुक्षिपक्षगताश्चान्ये हयाः परमदुर्जया ।
सप्ततिर्द्वे सहस्रे च गजास्तावन्त एव च ।
मध्ये व्यूढरथस्त्वस्तु वज्रदंष्ट्रो महाबलः ।
धनुर्विस्फारयन्घोरं ननाद प्रजहास च ।
धनुःशतसहस्राणि राक्षसानां महात्मनाम् । [40]
नानाप्रहरणानां च बभूवुस्तस्य संयुगे ।
गदाभिः परिघैः शूलैः पट्टिशैः कूटमुद्गरैः ।
प्रगृहीतैर्व्यराजन्त राक्षसा पर्वता इव ।
गर्जन्तो विनदन्तश्च क्रोशन्तश्चैव राक्षसाः ।
ततो युद्धाय निर्जग्मुः समरेष्वनिवर्तिनः । [45]
तत्र तूर्यसहस्राणां सज्जे निनदो महान् ।
हयानां च गजानां च गर्जतामतिवेगिनाम् ।
स तु दुन्दुभिनिर्घोषः पर्जन्यनिनदोपमः ।
शुश्रुवे शङ्खशब्दश्च राक्षसैः सुमहीरितः ।
तेन शङ्खनिनादेन भेरीतूर्यरवेण च । [50]
रथानां च निनादेन चुक्षोभेव नभस्तलम् ।
सागरप्रतिमोद्धेन बलेन महता वृतः ।
वज्रदंष्ट्रोऽतिसंक्रुद्धो निर्ययौ क्रूरचोदितः ।
तस्य निष्पततो वेगाद्युद्धार्थं युद्धकाङ्क्षिणः ।
हया निपतिताश्चास्य गद्गदश्चाभवत्स्वरः । [55]

अन्तरिक्षात्पपातोल्का वायुश्च परुषो ववौ ।
वमन्ति स्म शिवाज्वालाः शिवा घोराश्च पश्यतः ।
उत्पातांस्तान्महाघोरान्प्रदृश्य युधि दुर्जयः ।
उवाच वचनं श्रीमान्तत्कालक्षममुत्तमम् ।
अद्याहं दर्शयिष्यामि स्वबाहुबलमूर्जितम् । [60]
अद्य मद्बाणनिहतास्तान्द्रक्ष्यथ वनौकसः ।
बानरा निहता येषां हरिभिर्यत्र संयुगे ।
अद्य ते निर्वपिष्यन्ति शत्रुमांसेन राक्षसाः ।
इदमद्य समुद्भूतं रजः समरमूर्धनि ।
अद्य वै शमयिष्यामि शत्रुशोणितविस्रवैः । [65]
हृष्टाः सन्तु मोदन्तां त्यक्त्वा वै राघवाद्भयम् ।
अद्याहं निहनिष्यामि स्वबाहुबलमाश्रितः ।
कालमिन्द्रं कुबेरं च वरुणं समरुद्गणम् ।
तोषयिष्यामि राजानं रावणं विक्रमैः स्वकैः ।
वानरान्सकलान्हत्वा सुग्रीवं च हरीश्वरम् । [70]
मानुषौ भक्षयिष्यामि तापसौ द्वावनापसौ ।
अक्षया सन्ति मे बाणा सर्वे ह्याशीविषोपमाः ।
स्थातुं मम पुरः शक्ता के रणे जीवितार्थिनः ।
हत्वा रिपुजनं सर्वं पुनरेष्याम्यहं पुरीम् ।
हतस्य त्रिदिवे वासो नास्ति युद्धसमा गतिः । [75]
भवन्तः पृष्ठतः कृत्वा भयं राक्षसमत्तमाः ।
निहत्यैतान्हरीन्सर्वान्मोदन्तां सुखिता इव ।

